फलोदयान्ताय—फलस्य उदयः फलोदयः, स एव अन्तः यस्य (बहु०), तस्मै, 'फल के लाभ की अवधि तक' । तपःसमाधये—तपसः समाधिः, तस्मै । अरण्यनिवासम्—अरण्ये निवासस्तम्, वनवास । अयाचत—√याच् द्विकर्मक है, 'अरण्यनिवासम्' प्रधान कर्म तथा 'पितरम्' गौण कर्म है ।

हिन्दी—कभी स्थिरचित्त वाली उस (पार्वती) ने अपना मनोरथ जानने वाले पिता (हिमालय) से विश्वस्त सखी के मुख द्वारा फल के लाभ पर्यन्त तप और नियम करने को अपने लिए वनवास की प्रार्थना की । [६]

अथानुरूपाभिनिवेशतोषिणा
कृताभ्यनुज्ञा गुरुणा गरीयसा ।

प्रजासु पश्चात् प्रथितं तदाख्यया
जगाम गौरी शिखरं शिखण्डिमत् ॥ ७ ॥*

अन्वयः—अथ गौरी अनुरूपाभिनिवेशतोषिणा गरीयसा गुरुणा कृताभ्यनुज्ञा पश्चात् प्रजासु तदाख्यया प्रथितं शिखण्डिमत् शिखरं जगाम।

वाच्यपरि०—....गौर्या....कृताभ्यनुज्ञया....(सत्या) जग्मे।

श०—अनुरूप—योग्य। अभिनिवेश—आग्रह, हठ। गरीयस्—पूज्यतम। अभ्यनुज्ञा—अनुमति। प्रथित—प्रसिद्ध। शिखण्डिमत्—मोरों से भरपूर। शिखर—चोटी।

मल्लि०—अथेति। अथ गौरी (अनुरूपाभिनिवेशतोषिणा) अनुरूपेण योग्येन अभिनिवेशेन आग्रहेन तुष्यतीति तथोक्तेन। गरीयसा पूज्यतमेन। गुरुणा पित्रा। कृताभ्यनुज्ञा 'तपः कुरु' इति कृतानुमतिः सती। पश्चात् तपःसिद्ध्युत्तरकालम्। प्रजासु जनेषु। तदाख्यया तस्या गौर्याः संज्ञया। प्रथितं गौरिशिखरमिति प्रसिद्धमित्यर्थः। शिखण्डिमत् न तु हिंस्रप्राणिप्रचुरमिति भावः। शिखरं शृङ्गम्। जगाम ययौ ॥ ७ ॥

टि०—अनुरूपाभिनिवेशतोषिणा—अनुमतं रूपं यस्य सः अनुरूपः (बहु०), 'योग्य', अनुरूपः यः अभिनिवेशः, तेन तुष्यतीति अनुरूपाभिनिवेशतोषी, तेन, 'योग्य आग्रह से प्रसन्न हुए (पिता) द्वारा'। अभिनिवेश—अभि + नि + √ विश् ६ आ० + घञ्, 'आग्रह, लगन, हठ'; देखो, मालविका० 'प्रतिबन्धवत्स्वपि विषयेष्वभिनिवेशकारी'; अर्थात् 'दुष्प्राप्य वस्तुओं की इच्छा करना'; देखो, विक्रम० 'अहो नु खलु दुर्लभाभिनिवेशी मदनः'। तोषिणा—तुष्+णिनि, तृतीया एक०। गरीयसा—गुरु+ईयसुन्=गरीयस् (द्विवचनविभज्योपपदे तरप् ईयसुनौ पा० ५. ३. ५७), इसी प्रकार इष्ठन् जोड़कर गरिष्ठ; इसी प्रकार लघीयस् लघिष्ठ; वरीयस् वरिष्ठ। कृताभ्यनुज्ञा—कृता अभ्यनुज्ञा यस्याः सा (बहु०), जिसने अनुमति पा ली थी। तदाख्यया—तस्याः आख्या तया, उसके नाम से। प्रथित—प्रथ्+क्त 'प्रसिद्ध'। शिखण्डिमत्—शिखण्डोऽस्यास्तीति शिखण्डी; शिखण्ड+इन्, 'मोर'। शिखण्डिनः सन्त्यस्मिन्निति शिखण्डिमत्, शिखण्डि+मतुप् (तदस्यास्त्यस्मिन्निति मतुप् पा० ५. २. ९४)।

हिन्दी—तदनन्तर गौरी के योग्य आग्रह से प्रसन्न हुए पूज्यतम पिता द्वारा अनुमति पाने पर पार्वती मोरों से भरपूर शिखर पर गई, जो पीछे से उसके (गौरी-शिखर) नाम से लोगों में प्रसिद्ध हुआ। [७]

विमुच्य सा हारमहार्यनिश्चया
विलोलयष्टिप्रविलुप्तचन्दनम् ।
बबन्ध बालारुणबभ्रु वल्कलं ।
पयोधरोत्सेधविशीर्णसंहति ॥ ८ ॥

अन्वयः—अहार्यनिश्चया सा विलोलयष्टिप्रविलुप्तचन्दनं हारं विमुच्य बालारुणबभ्रु पयोधरोत्सेधविशीर्णसंहति वल्कलं बबन्ध।

वाच्यपरि०—अहार्यनिश्चयया तया......बबन्धे।

श०—अहार्य—न बदलनेवाला, दृढ़। विलोल—चंचल। यष्टि—लड़ी। प्रविलुप्त—पौंछा हुआ। चन्दन—चन्दन-लेप। अरुण—लाल। बभ्रु—पिङ्गलवर्ण। पयोधर—स्तन। उत्सेध—ऊपर उठा होना। विशीर्ण—हटा हुआ। संहति—सम्पर्क। वल्कल—छाल का वस्त्र। बबन्ध—बाँध लिया।

मल्लि०—विमुच्येति। अहार्यनिश्चया अनिवार्यनिश्चया। सा गौरी। विलोलयष्टिप्रविलुप्तचन्दनं विलोलाभिः चलाभिः यष्टिभिः प्रतिसरैः प्रविलुप्तं प्रमृष्टं चन्दनं स्तनान्तर्गतं येन तं तथोक्तम्। हारं मुक्तावलीम्। विमुच्य विहाय। बालारुणबभ्रु बालार्कपिङ्गलम्। पयोधरोत्सेधविशीर्णसंहति पयोधरयोः स्तनयोः उत्सेधेन उच्छ्रायेण विशीर्णा विघुटिता त्रुटिता संहतिः अवयवसंश्लेषो यस्य तद् तथोक्तम्। वल्कलं कण्ठलम्बि स्तनोत्तरीयभूतम्। बबन्ध धारयामास इत्यर्थः ॥ ८ ॥

टि०—अहार्यनिश्चया—न हार्यः (√हृ+ण्यत्) अहार्यः (नञ् तत्पु०), अहार्यो निश्चयो यस्याः सा (बहु०), दृढ़ निश्चयवाली। विलोलयष्टिप्रविलुप्तचन्दनम्—विशेषेण लोलाः विलोलाः, ताभिः यष्टिभिः प्रविलुप्तं चन्दनं येन (बहु०) तम्, जो हिलती हुई लड़ियों से चंदन-लेप को पौंछ रही थी। यष्टि—हारलता ('यष्टि हारलताशस्त्रभेदयोः' विश्व)। बालारुणबभ्रु (नपुं०) 'वल्कलम्' का विशेषण है; बालश्चासौ

अरुणः बालारुणः, स इव बभ्रु (कर्म०) तत्, नये उदय हुए सूर्य के समान रक्तवर्ण। अरुण—√ऋ 'जाना' (अर्तेश्च उ०. ३. ६०)+उनन्, सूर्य। देखो, 'अरुणो भास्करेऽपि स्याद्वर्णभेदेऽपि च त्रिषु।' अमर।

इसका अर्थ 'नया उदय हुआ सूर्य' भी है। देखो--

अरुणोऽव्यक्तरागेऽर्के संध्यारागेऽर्कसारथौ।

निःशब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु॥ मेदिनी।

'प्रातःकालीन सूर्य' के अर्थ में देखो—'तरुणारुणांशुकपिला' कुंदमाला १. २। बभ्रु—पिङ्गलवर्ण। देखो,

'बभ्रुर्विशाले नकुले कृशानावग्रजे मुनौ शूलिनि पिङ्गले च।' विश्व। पयोधरोत्सेधविशीर्णसंहति—(नपुं०) 'वल्कलम्' का विशेषण है। पयसः धरौ पयोधरौ, पयोधरयोः उत्सङ्गेन विशीर्णा संहतिर्यस्य (बहु०) तत्, जिसका दृढ़ सम्पर्क स्तन-युगल के ऊपर उठे होने से हट गया; उत्सेध—उत् + √सिध् + घञ् (भावे पा० ३. ३. १८), ऊपर उठा होना। ('उत्सेधः काय उन्नतिः' अमर)। संहति—सम् + √हन् + क्तिन्, 'सम्पर्क'।

हिन्दी--स्थिर निश्चयवाली उस (पार्वती) ने हिलती हुई लड़ियों से चन्दन को मिटानेवाली माला को छोड़कर नये उदय हुए सूर्य के समान पिङ्गल वर्ण का वल्कल बाँध लिया, जिसका दृढ़ सम्पर्क स्तन-युगल के ऊपर उठे होने से (अंगों के साथ से) हट गया। [८]

यथा प्रसिद्धैर्मधुरं शिरोरुहै-
र्जटाभिरप्येवमभूत्तदाननम्।
न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते॥ ९॥*

अन्वयः—तदाननं प्रसिद्धैः शिरोरुहैः यथा मधुरम् अभूत् जटाभिः अपि एवम् मधुरम् अभूत्। पङ्कजं षट्पदश्रेणिभिः एव न (अपितु) सशैवलासङ्गम् अपि प्रकाशते।

वाच्यपरि०—तदाननेन ...मधुरेण अभावि। पङ्कजेन....सशैवलासङ्गेनापि प्रकाश्यते।

श०—आनन—मुख। प्रसिद्ध—सजा हुआ। शिरोरुह—केश। मधुर—प्रिय, सुन्दर। पङ्कज—कमल। षट्पद—भौंरा। श्रेणि—पंक्ति। शैवल—काई, सेवाल। आसङ्ग—सम्पर्क।

मल्लि०—यथेति। तस्या देव्या आननं तदाननम्। प्रसिद्धैः भूषितैः "प्रसिद्धौ ख्यातभूषितौ" इत्यमरः। रोहन्तीति रुहाः "इगुपधज्ञाप्रीकिरः कः" इति कप्रत्ययः। शिरसि रुहाः तैः शिरोरुहैः मूर्धजैः। यथा मधुरं प्रियम् अभूत्, "स्वादुप्रियौ तु मधुरौ" इत्यमरः। जटाभिरप्येवं मधुरम् अभूत्। तथाहि पङ्कजं पद्मम्। षट्पदश्रेणिभिः भ्रमरपङ्क्तिभिः एव न, किन्तु सह शैवलासङ्गेन सशैवलासङ्गमपि। "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः। प्रकाशते शैवलेनापि शोभत एव इत्यर्थः॥ ६॥

टि०—तदाननम्—तस्या आननम्। प्रसिद्ध—भूषित, अलंकृत; देखो ('प्रसिद्धौ ख्यातभूषितौ।' अमर)। शिरोरुह—शिरसि रोहन्तीति शिरोरुहाः; शिरस् +√रुह् + क (इगुपधज्ञाप्रीकिरः कः पा० ३. १. १३५), केश। पङ्कज—पङ्के पङ्काद्वा जायत इति तत्। षट्पदश्रेणिभिः—षट् पदान्येषाम् षट्पदाः तेषां श्रेणिभिः, 'भ्रमर-पंक्ति द्वारा'। सशैवलासङ्गम्—शैवलानाम् आसङ्गः शैवलासङ्गः (षष्ठी तत्पु०), तेन सह वर्त्तमानं तत् (बहु०), 'काई के साथ'। शैवल—√शी + वलञ् (शीङो धुक्लक्वलञ्वालनः उ० ४.३८), (शैवलः 'जले शेते तिष्ठति'इति), सेवाल। देखो,

'जलनीली तु शेवालं शैवालः' अमर।

'शेवलश्चैव शेवालः शैवलो जलनीलिका' वाचस्पति।

आसङ्ग—कवि के कहने का तात्पर्य यह है कि कुरूप वस्तु भी वास्तव में सुन्दर पदार्थ की सुन्दरता को कम नहीं कर पाती। देखो,

'सरसिजमनुविद्धं शैवलेनापि रम्यम्' शाकु० १. २०.

हिन्दी—उसका मुख (पुष्पों के अलंकार धारण करने से) सजे बालों द्वारा जैसे प्रिय प्रतीत होता था, जटाओं से भी वैसा ही (प्रिय) प्रतीत होता था। कमल केवल भ्रमर-पंक्ति से ही सुशोभित नहीं होता है, किन्तु काई के साथ होने पर भी शोभायमान होता है। [६]

प्रतिक्षणं सा कृतरोमविक्रियां
व्रताय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्वनिबद्धया तया
सरागमस्या रसनागुणास्पदम् ॥ १० ॥

अन्वयः—व्रताय सा प्रतिक्षणं कृतरोमविक्रियां त्रिगुणां यां मौञ्जीं बभार तत्पूर्वनिबद्धया तया अस्याः रसनागुणास्पदं सरागम् अकारि ।

वाच्यपरि०—तया व्रताय प्रतिक्षणं कृतरोमविक्रिया त्रिगुणा या मौञ्जी""बभ्रे, तत्पूर्वनिबद्धा सा अस्याः रसनागुणास्पदं सरागम् अकार्षीत् ।

श०—प्रतिक्षणम्—हर क्षण । रोमविक्रिया—रोमांच । त्रिगुण—तीन डोरों की । मौञ्जी—मुंज की बनी तगड़ी । निबद्ध—बँधी हुई । रसना—तगड़ी । गुण—डोरा । आस्पद—स्थान । राग—लाल रंग ।

मल्लि०—प्रतीति । सा देवी । प्रतिक्षणं क्षणे क्षणे । कृतरोमविक्रियां पारुष्यात् कृतरोमाञ्चाम् । त्रिगुणां—त्रिरावृत्ताम् । यां मौञ्जीं मुञ्जमयीं मेखलाम् । व्रताय तपसे । बभार । (तत्पूर्वनिबद्धया) तदेव पूर्वं प्रथमं यस्य तत्पूर्वं यथा तथा निबद्धया । तया मौञ्ज्या । अस्याः देव्याः । (रसनागुणास्पदं) रसनागुणस्याऽऽस्पदं स्थानं जघनम् । सह रागेण सरागं सलोहितम् । अकारि कृतम्, सौकुमार्यातिशयादिति भावः ॥ १० ॥

टि०—प्रतिक्षणम्—क्षणे क्षणे इति (अव्ययी०), इससे 'वीप्सा' बारबार का बोध होता है । कृतरोमविक्रियाम्—कृता रोम्णां विक्रिया यया (बहु०), ताम्, 'जिससे रोमांच होता था' । मुंज की बनी तगड़ी के कठोर होने से रोमांच हो जाता है । देखो, 'पारुष्यात्कृतरोमाञ्चाम्' । त्रिगुणाम्—त्रयो गुणा यस्याः (बहु०), ताम्; 'तीन डोरों की बनी, तीहरी' । ब्राह्मण को मुंज की तीन डोरों की बनी तगड़ी पहनने की आज्ञा है ।

"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी ॥" मनु

तत्पूर्वनिबद्धया—तदेव पूर्वं तत्पूर्वं यथा स्यात्तथा निबद्धया, 'पहली बार बाँधी गई' । रसनागुणास्पदम्—रसनायाः गुणः रसनागुणः, 'तगड़ी का डोरा', तस्य आस्पदम्; आस्पदम्—आपद्यतेऽस्मिन्निति (आस्पदं

प्रतिष्ठायाम् पा० ६. १. १४६) । अमर ने 'आस्पद' शब्द का प्रयोग प्रतिष्ठाकृत्य के अर्थ में किया है 'प्रतिष्ठाकृत्यमास्पदम्' । यहाँ यह केवल साधारण स्थान के अर्थ में हुआ है । इस अर्थ के लिए देखो, 'आस्पदं पदकृत्ययोः' मेदिनी । सरागम्—रागेण सह वर्तत इति (बहु०), लाल । अकारि—√कृ ८ उभय० लुङ् कर्मवाच्य ।

हिन्दी—उसने तपस्या के लिए प्रतिक्षण रोमांच करनेवाली जिस तीहरी मुंज की बनी हुई तगड़ी को धारण किया था, पहली बार बन्धी हुई उस तगड़ी ने उसकी कमर को लाल कर दिया । [१०]

विसृष्ट रागादधरान्निवर्त्तितः
स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादान परिक्षताङ्गुलिः
कृतोऽक्षसूत्र-प्रणयी तया करः ॥ ११ ॥

अन्वयः—तया विसृष्टरागात् अधरात् स्तनाङ्गरागारुणितात् कन्दुकात् च निवर्त्तितः कुशाङ्कुरादानपरिक्षताङ्गुलिः करः अक्षसूत्रप्रणयी कृतः ।

वाच्यपरि०—सा...निवर्त्तितं करं कुशाङ्कुरादानपरिक्षताङ्गुलिम् अक्षसूत्रप्रणयिनं कृतवती ।

श०—विसृष्ट—त्यक्त, रहित । राग—रंग । अधर—निचला होंठ । अङ्गराग—उबटन । अरुणित—लाल किया गया । कन्दुक—गेंद । परिक्षत—घायल । अक्षसूत्र—माला । प्रणयिन्—प्रेमी ।

मल्लि०—विसृष्टेति । तया देव्या । विसृष्टरागात् त्यक्तलाक्षारस-रञ्जनात् । अधरात् अधरोष्ठात् । निवर्त्तितः, निसृष्टरागात् इति पाठे नितरां त्यक्तलाक्षारागात् । रागत्यागेन निष्प्रयोजनत्वादिति भावः । तथा (स्तनाङ्गरागारुणितात्) स्तनाङ्गरागेणारुणितादरुणीकृतात्, पतनसमये तस्य स्तनयोरुपरोधादिति भावः । कन्दुकात् च निवर्त्तितः । कुशाङ्कुरादानपरिक्षताङ्गुलिः—कुशस्य अङ्कुराणामादानेन परिक्षताः व्रणिताः अङ्गुलयो यस्य स तथोक्तः । करः पाणिः । अक्षसूत्रप्रणयी अक्षमाला-सहचरः । कृतः ॥ ११ ॥

टि०—विसृष्टरागात्—विसृष्टः रागः यस्य (बहु०), तस्मात्, जिससे रंग हट गया था। अधरात्—निचले होंठ से; अधरः—न धरतीति √धृ+अच् (पचाद्यच् पा० ३. १. १३४); यद्वा धरादुच्चात्कठिनाद्वान्यः (देखो, 'अधरस्तु पुमानोष्ठे हीनेऽनूर्ध्वेऽपि वाच्यवत्।' मेदिनी)। स्तनाङ्गरागारुणितात्—स्तनयोः अङ्गरागः स्तनाङ्गरागः (तत्पु०), तेन अरुणितस्तस्मात्; अङ्गराग—अङ्गानां रागः, 'उबटन'। देखो, 'विच्छित्तिः स्त्रीकषायोऽङ्गरागके' रभसः। अरुणितात्—अरुण (√ऋ+उनन्)+इतच् (तदस्य सञ्जातं तारकादिभ्य इतच् पा० ५. २. ३६), लाल किया गया। निवर्तित—हटाया गया। कुशाङ्कुरादानपरिक्षताङ्गुलिः—कुशस्य अङ्कुराणाम् आदानेन परिक्षताः अङ्गुलयो यस्य (बहु०) सः, 'जिसकी अंगुलियाँ नये कुश के तोड़ने से छिद गई थीं'। अंकुर—अंकि+उरच् (मन्दिवाशिमथि० उरच् ३. १. ३८), (देखो, 'अङ्कुरोऽभिनवोद्भिदि।' अमर; अङ्कुरो रोम्णि सलिले रुधिरेऽभिनवोद्गमे।' हैम)। अक्षसूत्रप्रणयी—अक्षाणां सूत्रः अक्षसूत्रः, तस्य प्रणयी। अक्षसूत्र—रुद्राक्ष-माला। अक्ष, जिसका अर्थ 'बीज' है, विशेष रूप से शिव को प्रिय होने के कारण, रुद्राक्ष कहलाने लगा। पार्वती ने शृंगार की वस्तुओं से अपना मन हटाकर तप और व्रत की ओर लगा लिया।

हिन्दी—उसने अधरोष्ठ को रंगने तथा स्तन-युगल के (कुंकुम आदि) रंगों द्वारा लाल हुए गेंद खेलने से अपना हाथ हटाकर रुद्राक्ष-माला का प्रेमी बनाया और उसके हाथ की अंगुलियाँ कुशांकुरों के तोड़ने से छिद गई थीं। [११]

महार्ह-शय्या-परिवर्त्तन च्युतैः
स्वकेश पुष्पैरपि या स्म दूयते।
अशेत सा बाहुलतोपधायिनी
निषेदुषी स्थण्डिल एव केवले ॥ १२ ॥

अन्वयः—महार्हशय्यापरिवर्त्तनच्युतैः स्वकेशपुष्पैः अपि या (पार्वती) दूयते स्म सा केवले स्थण्डिले बाहुलतोपधायिनी एव अशेत निषेदुषी च।

वाच्यपरि०—....यया दूयते ....तया बाहुलतोपधायिन्या.... अशय्यत निषेदे च ।

श०—महार्ह—बहुमूल्य । परिवर्तन—लोटना । दूयते स्म—दुःखी होती थी । उपधान—तकिया । स्थण्डिल—भूमि । निषेदुषी—बैठती थी ।

मल्लि०—महार्हेति । महार्हशय्यापरिवर्त्तनच्युतैः महान् अर्हो मूल्यं यस्याः सा महार्हा श्रेष्ठा या शय्या तस्यां परिवर्त्तनेन लुण्ठनेन च्युतैः भ्रष्टैः । स्वकेशपुष्पैः अपि, सा देवी । दूयते स्म क्लिश्यति स्म, पुष्पाधिक-सौकुमार्यादिति भावः । सा देवी बाहुलताम् उपधत्ते उपधानीकरोतीति बाहुलतोपधायिनी सती । केवले संस्तरणरहिते । स्थण्डिले भूमौ । एव अशेत शयितवती, तथा निषेदुषी उपविष्टा च । 'क्वसुश्च' इति क्वसुः, उगितश्च इति ङीप् । भूमौ एव शयनादिव्यवहारो न जातूप-रीत्यर्थः ॥ १२ ॥

टि०—महार्हशय्यापरिवर्त्तनच्युतैः—महान् अर्हो यस्याः सा महार्हा, महार्हायां शय्यायां तत् परिवर्त्तनं तैः च्युतानीति महार्हशय्या-परिवर्त्तनच्युतानि तैः, बहुमूल्य शय्या पर लोटने से गिरे हुए । स्वकेशपुष्पैः—स्वस्याः केशाः स्वकेशाः, तेषां पुष्पाणि तैः, 'केशों में लगे फूलों से' । दूयते—√दू 'पीड़ा अनुभव करना' । बहुमूल्य शय्या पर केशों के फूलों के गिरने से पार्वती को पीड़ा होती थी, इससे उसके शरीर की कोमलता का परिचय प्राप्त होता है । कवि लोग प्रायः नायिका के अंगों की कोमलता का वर्णन करते हैं । नागानन्द में नायक इस बात पर आश्चर्य प्रकट करता है कि नायिका का हाथ जो फूल के तोड़ने में भी असमर्थ था, फाँसी का फंदा किस प्रकार पकड़ सका । देखो,

न खलु न खलु मुग्धे साहसं कार्यमीदृक्
व्यपनय करमेतं पल्लवाभं लतायाः ।
कुसुममपि विचेतुं यो न मन्ये समर्थः
कलयति स कथं ते पाशमुद्बन्धनाय ॥ २. ११.

मालतीमाधव नाटक में कहा गया है कि मालती अपनी सखियों द्वारा हँसी में उसके ऊपर फेंके गये शिरीष पुष्पों से भी पीड़ित होती थी । देखो,

प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् । ९. ३१.

बाहुलतोपधायिनी—प्रशस्तो बाहुः बाहुलता, 'लता रूपी भुजा', बाहुलताम् उपधत्ते इति सा; उप + √ धा + णिनिः (व्रते पा० ३. २. ८०)+ङीप्; उप+√धा+ल्युट् का अर्थ है 'तकिया' अर्थात् भुज-लता का तकिया बनानेवाली । स्थण्डिल—स्थलन्त्यस्मिन्निति, 'यज्ञभूमि' । देखो,

'यज्ञार्थं परिष्कृताया अनिम्नोन्नताया यज्ञभूमेः ।' मुकुट

निषेदुषी—नि+√सद् + क्वसु (भाषायां सदवसश्रुवः पा० ३. ४. १०८) + ङीप् (उगितश्च पा० ४. १. ६); निषेदिवस् का कर्ता विभक्ति एक०, नि + √सद् 'लेटना, बैठना' । देखो,

निषेदुषीमासनबन्धधीरः । (रघु०)

हिन्दी—बहुमूल्य शय्या पर लोटने से गिरे हुए अपने केशों के फूलों से भी जो कष्ट मानती थी, वह (पार्वती) अपनी भुज-लता का तकिया बनानेवाली केवल (अनाच्छादित; बिना कुछ बिछाये) यज्ञ-भूमि पर (रात में) सोती और (दिन में) बैठती थी । [१२]

पुनर्ग्रहीतुं नियमस्थया तया
द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलास-चेष्टितं
*विलोल-दृष्टं हरिणाङ्गनासु च ॥ १३ ॥**

अन्वयः—नियमस्थया तया द्वयेऽपि द्वयं पुनः ग्रहीतुं निक्षेपम् अर्पितम् इव, तन्वीषु लतासु विलासचेष्टितं हरिणाङ्गनासु विलोलदृष्टं च ।

वाच्यपरि०—नियमस्था सा...निक्षेपम् अर्पितवती... ।

श०—नियम—व्रत । निक्षेप—धरोहर । तन्वी—सूक्ष्मांगी । विलासचेष्टित—विलास लीला । अङ्गना—स्त्री । विलोल—चंचल ।

मल्लि०—पुनरिति । नियमस्थया व्रतस्थया । तया देव्या । द्वयेऽपि द्वयं पुनः ग्रहीतुम् पुनरानेतुम् । निक्षेपः अर्पितमिव निक्षेपत्वेन अर्पितं किमु ! क्वचित् 'द्वयीषु' इति प्रामादिकः पाठः । कुत्र द्वये किं द्वयम् अर्पितमित्याह—तन्वीषु लतासु । विलास एव चेष्टितं विलासचेष्टितम् ।

हरिणाङ्गनासु। विलोलदृष्टं चञ्चलावलोकितम् च। व्रतस्थायां तस्यां तयोरदर्शनाल्लतादिषु दर्शनाच्च अर्पितम् इवेत्युत्प्रेक्षा, न तु वस्तुतोऽर्पणमस्तीति भावः ॥ १३ ॥

टि०—**नियमस्थया**—नियमे तिष्ठतीति नियमस्था (उपपद०), तया, नियम+स्था+क (आतोऽनुपसर्गे कः पा० ३. २. ३) + आ, नियम का यहाँ अर्थ 'तपस्या' है। **द्वयम्**—द्वि+अयच् (द्वित्रिभ्यां तयस्य अयज्वा पा० ५. २. ४३)। द्वि और त्रि के आगे त्यप् के बदले विकल्प में अयच् प्रत्यय लगता है, इस प्रकार द्वयम् और त्रयम् रूप बने। तयप् प्रत्यय द्वारा द्वि और त्रि के द्वितयम्, त्रितयम् रूप वने। (संख्याया अवयवे तयप् पा० ५. २. ४२)। **अर्पित**—रख दी गई। **तन्वीषु**—तन्वी, तनु 'सूक्ष्म'; तनु—√तन् + उ (अतिपृवपियजितनि० उ० २. ११७)। इसी प्रकार अरुः, परुः, वपुः, यजुः। तनु के विविध अर्थों के लिए देखो,

'तनुः काये त्वचि स्त्री स्यात्त्रिष्वल्पे विरले कृशे।' मेदिनी

विलासचेष्टितम्—विलास एव चेष्टितम् (कर्म०), विलास लीला। विलास—स्त्रियों की कामात्मक चेष्टा का सूचक विशेष संकेत। स्त्रियों के अठारह आभूषणों में से विलास एक आभूषण कहा गया है। देखो,

यानस्थानासनादीनां मुखनेत्रादिकर्मणाम्
विशेषस्तु विलासः स्यादिष्टसन्दर्शनादिना ॥ साहित्यदर्पण

हरिणाङ्गनासु—हरिणानाम् अङ्गनाः हरिणाङ्गनाः (तत्पु०); हरिणियाँ; तासु हरिणाङ्गनासु। **विलोलदृष्टम्**—विलोलं च तद् दृष्टं तत् (कर्म०), चंचल दृष्टि।

हिन्दी – नियमों को पालनेवाली उस (पार्वती) ने दोनों में दोनों (वस्तुएँ) फिर ले लेने के लिए मानो धरोहर रख दी – कोमल लताओं के पास विलास लीला और हरिणियों के पास चंचल दृष्टि। [१३]

अतन्द्रिता सा स्वयमेव वृक्षकान्
घटस्तन-प्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्त-जन्मनां
न पुत्रवात्सल्यमपाकरिष्यति ॥ १४ ॥

अन्वयः—सा स्वयमेव अतन्द्रिता सती वृक्षकान् घटस्तनप्रस्रवणैः व्यवर्धयत्, गुहः अपि प्रथमाप्तजन्मनां येषां पुत्रवात्सल्यं न अपाकरिष्यति।

वाच्यपरि०—तया अतन्द्रिता (सत्या) वृक्षका....व्यवर्ध्यन्त, गुहेन अपाकरिष्यते।

श०—अतन्द्रिता—आलस्य रहित होकर। वृक्षक—पौधा। प्रस्रवण—दूध की धार। व्यवर्धयत्—पाला, बढ़ाया। आप्त—प्राप्त, लब्ध। पुत्रवात्सल्य—पुत्र-प्रेम। अपाकरिष्यति—दूर करेगा।

मल्लि०—अतन्द्रितेति। सा देवी। स्वयमेव अतन्द्रिता असञ्जाततन्द्रा सती, "तारकादित्वात्" इतच् प्रत्ययः। वृक्षकान् स्वल्पवृक्षान् 'अल्पे' इति अल्पार्थे कः प्रत्ययः। (घटस्तनप्रस्रवणैः) घटावेव स्तनौ तयोः प्रस्रवणैः प्रस्नुतपयोभिः। व्यवर्धयत्। गुहः कुमारः। अपि प्रथमाप्तजन्मनां प्रथमलब्धजन्मनाम्, अग्रजातानामित्यर्थः। येषां वृक्षकाणां सम्बन्धि पुत्रवात्सल्यं सुतप्रेम। न अपाकरिष्यति। उत्तरत्र कुमारोदयेऽपि न तेषु पुत्रवात्सल्यं निवर्त्तिष्यत इत्यर्थः॥ १४॥

टि.—अतन्द्रिता—तन्द्रा सञ्जाता अस्या इति तन्द्रिता, तन्द्रा+इतच् (तदस्य सञ्जातं तारकादिभ्य इतच् पा० ५. २. ३६), न तन्द्रिता अतन्द्रिता (अनञ् तत्पु०) 'न थकी हुई' अर्थात् 'फुर्ती से'। वृक्षकान्—लघुतरः वृक्षः वृक्षकः, वृक्ष+कन् (ह्रस्वे पा० ५. ३. ८६), बहु०, पौधे। घटस्तनप्रस्रवणैः—घटौ एव स्तनौ इति घटस्तनौ तयोः (कर्म०) प्रस्रवणैः, घड़े रूपी स्तनों की धाराओं से। प्रस्रवण—प्र+√स्रु+ल्युट् (अन), छाती से दूध का बहना, टपकना। व्यवर्धयत्—वि+√वृध्+णि+लङ्। गुहः—गूहति रक्षति सेनाम् इति, √गुह्+क (इगुपधज्ञा प्रीकिरः कः पा० ३. १. ३५)। गुह शिव के पुत्र कुमार कार्त्तिकेय का दूसरा नाम है। देखो,

'पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः।' अमर

प्रथमाप्तजन्मनाम्—प्रथमम् आप्तं जन्म यैः ते (बहु०) तेषाम्, 'जिनका जन्म पार्वती के विवाह से पहले हो चुका था,' गुह का अभी जन्म न हुआ था। अतएव वह पौधे, जिनके प्रति वह स्नेह भरी दृष्टि से देखती थी, उसके बड़े पुत्र थे। पुत्रवात्सल्यम्—पुत्रानुरूपं वात्सल्यम्

(मध्यमपदलोपी तत्पु०), पुत्र के प्रति स्नेह; वात्सल्यम्—वत्सलस्य भावः; वत्सल+ष्यञ् । अपाकरिष्यति—अप + आ + √ कृ लिट्, 'दूर कर देगा, हटा देगा।' पार्वती पौधों के पालने के लिए इतनी जुट गई थी कि कवि कहता है कि होनेवाला कुमार कार्त्तिकेय माता पार्वती की उनके प्रति ममता को हटा न सकेगा।

हिन्दी—उसने आलस्य छोड़कर स्वयं पौधों को स्तनरूपी घड़ों की जल-धाराओं से बढ़ाया, पहले जन्म को प्राप्त हुए जिनके प्रति पुत्र-स्नेह को कुमार कार्तिकेय भी दूर न कर सकेगा। [१४]

अरण्य-बीजाञ्जलि-दान लालिता-
स्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात्
पुरः सखीनाममिमीत लोचने ॥ १५ ॥

अन्वयः—अरण्यबीजाञ्जलिदानलालिताः हरिणाः च तस्यां तथा विशश्वसुः यथा कुतूहलात् तदीयैः नयनैः लोचने सखीनां पुरः अमिमीत ।

वाच्यपरि०—अरण्यबीजाञ्जलिदानलालितैः हरिणैः....विशश्वसे;.... अमीयेताम् ।

श०—अरण्य—वन । अञ्जलि—मुट्ठी । लालित—पालित । विशश्वसुः—विश्वास करती थी। कुतूहल—उत्सुकता। अमिमीत—नापा।

मल्लि०—अरण्येति। (अरण्यबीजाञ्जलिदानलालिताः) अरण्य-बीजानां नीवारादीनाम् अञ्जलयः तेषां दानेन लालिताः । हरिणाश्च तस्यां देव्याम् । तथा विशश्वसुः विस्रम्भं जग्मुः; "समौ विस्रम्भविश्वासौ" इत्यमरः । तथा कुतूहलात् औत्सुक्यात् । तदीयैः हरिणसम्बन्धिभिः । नयनैः नेत्रैः करणैः । स्वकीये लोचने सखीनां पुरः पुरतः । अनेन तेषां सम्बन्धसहत्वमुक्तम् । अमिमीत अक्षिपरिमाणतारतम्यज्ञानाय मानं चकार इत्यर्थः। केचित्तु सा पार्वती तदीयः नेत्रः कुतूहलात् पुरः अग्रे वर्त्तमानानां सखीनां लोचने अमिमीत व्रतस्थत्वान्नात्मन इत्याहुः । 'माङ् माने' इत्यस्माद्धातोर्लङ् । इयमेव खलु विश्वासस्य परा काष्ठा यदक्षिपीडनेऽपि न क्षुभ्यन्तीति भावः ॥ १५ ॥

टि०—अरण्यबीजाञ्जलिदानलालिताः—अरण्यबीजानाम् अञ्जलयः अरण्यबीजाञ्जलयः (तत्पु०), तेषां दानेन लालिताः, 'नीवार की मुट्ठियों के खिलाने से पाली गई'। अरण्यबीज नीवार को कहते हैं। अञ्जलिः—मुट्ठीभर। देखो,

अञ्जलिस्तु पुमान् हस्तसंपुटे कुडवेऽपि च।' मेदिनी

अञ्जलिपरिमितं दानम् अञ्जलिदानम् इति वा।

विशश्वसुः—वि+√श्वस् लिट्; √श्वस् का अर्थ वि उपसर्ग सहित होता है 'विश्वास करना'। उपसर्ग द्वारा धातु का अर्थ बदल जाता है। देखो,

'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।

प्रहाराहारसंहारविहारपरिहारवत्॥

तपस्वि-कन्याओं का मृग के प्रति प्रेम का वर्णन साहित्य में कई स्थलों पर मिलता है। देखो,

श्यामाकमुष्टिपरिवर्धितको जहाति

सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥ शाकु० ४. १३.

पार्वती में मृगों का इतना दृढ़ विश्वास था कि वह उनकी आँखों से अपनी आँखें नापा करती थी। 'सखीनाम्' शब्द 'पुरः' के साथ लिया जाना चाहिए, न कि 'लोचने' के साथ, क्योंकि 'लोचने' से उसकी अपनी आँखों का बोध होगा न कि उसकी सखियों की आँखों का। अन्यथा यह रचना इस प्रकार होती 'सखीनां लोचनानि'। कुतूहलात्—उत्सुकतावश, यह है कारण उनकी आँखों से अपनी आँखों के नापने का। अमिमीत—√मा ३ और ४ आ० 'नापना' लङ्।

हिन्दी—नीवार आदि की मुट्ठियों के खिलाने से पाली हुई हरिणियाँ उसमें इतना विश्वास करती थीं कि वह उत्सुकतावश सखियों के सामने उनकी आँखों से अपनी आँखें नापा करती थी। [१५]

कृताभिषेकां हुत-जातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम्।
दिदृक्षवस्तामृषयोऽभ्युपागमन्
न धर्मवृद्धेषु वयः समीक्ष्यते॥ १६॥

अन्वयः—...कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीम् अधीतिनीं तां दिदृक्षवः ऋषयः अभ्युपागमन्। धर्मवृद्धेषु वयः न समीक्ष्यते।

वाच्यपरि०—....ऋषिभिः दिदृक्षुभिः अभ्युपागामि।...समीक्षन्ते (शास्त्रकाराः)।

श० -अभिषेक—स्नान। जातवेदस्—अग्नि। त्वक्—छाल। उत्तरासङ्ग—उत्तरीय। अधीतिनी—वेदपाठ करनेवाली। दिदृक्षवः—देखने की इच्छावाले। अभ्युपागमन्—पास आते थे। धर्मवृद्ध—तप में बढ़े हुए। वयस्—आयु। समीक्ष्यते—देखी जाती है।

मल्लि०—कृतेति। कृताभिषेकां कृतस्नानाम्। हुतजातवेदसं हुताग्निकां कृतहोमाम् इत्यर्थः। (त्वगुत्तरासङ्गवतीम्) त्वचा वल्कलेन उत्तरासङ्गवतीम् उत्तरीयवतीम्। अधीतमस्या अस्तीति ताम् अधीतिनीं स्तुतिपाठादि कुर्वतीम् "इष्टादिभ्यश्च" इति 'इनि' प्रत्ययः। तां देवीम्। दिदृक्षवः द्रष्टुमिच्छवः। ऋषयः मुनयः। अभ्युपागमन् समुपागताः। न चात्र कनिष्ठसेवादोष इत्याह—धर्मवृद्धेषु वयो न समीक्ष्यते न प्रमाणीक्रियते, सति धर्मज्यैष्ठ्येन वयोज्यैष्ठ्यं प्रयोजकमित्यर्थः। तथाच मनुः—

"न तेन वृद्धो भवति येनास्य पलितं शिरः।
यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः॥" इति॥१६॥

टि०—कृताभिषेकाम्—कृतः अभिषेकः यया सा कृताभिषेका (बहु०), ताम्, 'जो स्नान कर चुकी थी'। अभिषेक का वही तात्पर्य है जो अभिषव का है। हुतजातवेदसम्—हुतः जातवेदः यया ताम्, 'जो हवन कर चुकी थी'। जातवेदस्—जात+विद्+असुन्, इसकी व्युत्पत्ति इस प्रकार है:—(१) जातं वेदो (धनं) यस्मात्, (२) जाते जाते विद्यत इति वा, (३) जातं वेत्ति वेदयते वा। त्वगुत्तरासङ्गवतीम्—त्वचा उत्तरासङ्गवती तम्, 'उसको जिसने छाल का बना उत्तरीय पहन रखा है'। उत्तरासङ्ग—उत्तरस्मिन् (शरीरभागे) आसङ्गोऽस्यास्तीति उत्तरासङ्गः; आसङ्ग—आ+√सञ्ज् १ पर० 'बाँधना'+घञ्। समास का विग्रह इस प्रकार भी हो सकता है:—त्वगेव उत्तरासङ्गोऽस्यास्तीति ताम्। त्वगुत्तरासङ्ग+मतुप्। अधीतिनीम्—अधीतम् अस्या अस्तीति अधीतिनी, ताम्; अधीत—

अधि+√इ २ पर० 'पढ़ना'+क्त, अधीत (इष्टादिभ्यश्च पा० ५. २. ८८)+इन+ई (ङीप्) स्त्रीलिङ्ग बनाने के लिए। दिदृत्तवः—दिदृत्तुः—द्रष्टुम् इच्छुः,√दृश् -सन्नन्त+उ (सनाशंसभित्त उः पा० ३. २. १६८)। इसी प्रकार चिकीर्षुः, जिगमिषुः आदि शब्द बने हैं। अभ्युपागमन्—अभि+उप+आ+√गम् लुङ्, 'पास आते थे'। धर्मवृद्धेषु—धर्मेण वृद्धेषु, 'धर्माचरण में बढ़े हुओं में'। समीक्ष्यते—सम्+√ईक्ष् लट् कर्मवाच्य। कवि के कहने का तात्पर्य यह है कि धर्मवृद्ध पुरुषों के लिए आयु का विचार नहीं किया जाता। पार्वती यद्यपि आयु में उनसे छोटी थी परन्तु वह महर्षियों द्वारा भी, गुणी होने के कारण, उनके लिए प्रशंसा की पात्र बन गई थी। देखो,

तेजसां हि न वयः समीक्ष्यते। रघु० ११. १.

प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः। भर्तृ० नीति० ३२.

गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः। उत्तर० ४. ११.

न तेन वृद्धो भवति, येनाऽस्य पलितं शिरः।

यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः॥ मनु

हिन्दी—जो स्नान करके हवन करती थी और वल्कलों के उत्तरीय वस्त्र पहने स्तुति-पाठ करती थी, उसे ऋषि-महर्षि देखने की इच्छा से आते थे, क्योंकि धर्माचरण में बढ़े-चढ़ों में आयु नहीं देखी जाती। [१६]

विरोधि सत्त्वोज्झित-पूर्व मत्सरं

द्रुमैरभीष्ट-प्रसवार्चितातिथि।

नवोटजाभ्यन्तर सम्भृतानलं

तपोवनं तच्च बभूव पावनम् ॥ १७ ॥

अन्वयः—विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैः अभीष्टप्रसवार्चितातिथि नवोटजाभ्यन्तरसम्भृतानलं तत् च तपोवनं पावनं बभूव।

वाच्यपरि०—विरोधिसत्त्वोज्झितपूर्वमत्सरेण द्रुमैः अभीष्टप्रसवार्चितातिथिना नवोटजाभ्यन्तरसम्भृतालेन तेन च तपोवनेन पावनेन बभूवे।

श०—विरोधिन्—वैरी। सत्त्व—जन्तु। उज्झित—त्यक्त। मत्सर—शत्रुता, हिंसा। अभीष्ट—अभिलषित। प्रसव—फल।

अर्चित—पूजित। उटज—कुटिया। अभ्यन्तर—भीतर। सम्भृत—सञ्चित, एकत्रित। पावन—पवित्र।

मल्लि०—विरोधीति (विरोधिसत्त्वोज्झितपूर्वमत्सरं) विरोधिभिः सत्त्वैः गोव्याघ्रादिभिः उज्झितपूर्वमत्सरं त्यक्तपूर्ववैरं हिंसारहितमित्यर्थः। द्रुमैः। (अभीष्टप्रसवार्चितातिथि) अभीष्टप्रसवेन इष्टफलेन अर्चिताः पूजिताः अतिथयोः यस्मिन् तत् तथोक्तम्। (नवोटजाभ्यन्तरसम्भृतानलं) नवानामुटजानां पर्णशालानाम् अभ्यन्तरेषु सम्भृताः सञ्चिताः अनलाः अग्नयो यस्मिन् तत्तथोक्तम्। तत् च तपोवनं पावयतीति। पावनं बभूव, अहिंसातिथिसत्काराग्निपरिचर्याभिर्जगत्पावनं बभूवेत्यर्थः॥ १७॥

टि०—विरोधिसत्त्वोज्झितपूर्वमत्सरम्—विरोधिभिः सत्त्वैः (तत्पु०) उज्झितः पूर्वः मत्सरः यस्मिन् (बहु०) तत्, 'जहाँ परस्पर विरोधी जन्तुओं द्वारा स्वाभाविक शत्रुता त्याग दी गई थी'। विरोधिन्—विरोधोस्यातीति विरोधिन्। उज्झित—√ उज्झ् ६ पर + क्त, त्यक्त। पूर्वमत्सरम्—पूर्वश्चासौ मत्सरः पूर्वमत्सरः (कर्म०) तत्, 'स्वाभाविक शत्रुता'। पूर्व से तात्पर्य यहाँ 'सहज, स्वाभाविक' से है, कृत्रिम के विरोध में। देखो, नकुल और सर्प की स्वाभाविक शत्रुता। मत्सर—जो पर-दुःख में प्रसन्न हो (माद्यति परकृच्छ्रे); 'मत्सरोऽन्यशुभद्वेषे' अमर। √मद् ४ पर० 'प्रसन्न होना' + सर (कृभूमादिभ्यः किन्) यहाँ यह वैर भाव में प्रयुक्त किया गया है। भिन्न-भिन्न अर्थों के लिए देखो,

> मत्सरो मक्षिकायां स्यान्मात्सर्यक्रोधयोः पुमान्।
> असह्यपरसंपत्तौ कृपणे चाभिधेयवत्॥ मेदिनी

अभीष्टप्रसवार्चितातिथि—अभीष्टैः प्रसवैः अर्चिता अतिथयः यस्मिन् (बहु०) तत्, 'जिसमें अभिलषित फलों द्वारा अतिथियों का सत्कार किया जाता था'। 'प्रसव' का अर्थ टीकाकारों ने फल किया है, परन्तु उसे फूल के अर्थ में लेना ठीक होगा। क्योंकि फूलों द्वारा वृक्ष अतिथि-सत्कार करते वर्णन किये गये हैं। देखो,

> मम ददत इवार्घ्यं पुष्पवृष्टिं किरन्तः।
> कथमतिथिसपर्यां शिक्षिताः शाखिनोऽपि॥ नागानन्द १.११.

फलों के बोझ के कारण झुक जाने से भी वृक्षों द्वारा अतिथि-सत्कार का वर्णन मिलता है:—

नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः । नागानन्द

प्रसव के विविध अर्थों के लिए देखो,

प्रसवो गर्भमोचने ।

उत्पादे स्यादपत्येऽपि फलेऽपि कुसुमेऽपि च ॥ मेदिनी

नवोटजाभ्यन्तरसम्भृतानलम्—नवानाम् उटजानाम् अभ्यन्तरेषु सम्भृता अनला यस्मिन् तत् (बहु०); उटज—उटेभ्यः पर्णेभ्यः जायते इति; उट+√जन+ड (पञ्चम्यां जनेर्डः पा० ३. २. ६८); उट 'पत्र, घास' (देखो 'उटस्तृणपर्णादिः' देशीकोष) ; सम्भृत—सम् + √भृ+क्त ; 'जहाँ कि प्रत्येक नई कुटिया में होमाग्नि प्रज्वलित रखी जाती थी।' पावनम्—पावयतीति; √पू+णि+ल्युट् (अन), पवित्र । पार्वती के योग-तपस्या के कार्यों द्वारा तपोवन में ऐसा परिवर्तन हो गया कि परस्पर विरोधी स्वभाववाले जन्तुओं ने अपनी सहज शत्रुता छोड़ दी, वृक्षों में अतिथि-सत्कार की भावना उत्पन्न हो गई, और अनेक कुटियाँ बन गईं, जिनमें यज्ञ की अग्नि सदा प्रज्वलित रहती थी ।

हिन्दी—वह तपोवन पवित्र हो गया, जिसमें परस्पर विरोधी प्राणियों ने अपनी पहली शत्रुता छोड़ दी थी, वृक्ष अभीष्ट फल-फूल देकर अतिथियों का सत्कार करते थे, और हर एक नई कुटिया में होमाग्नि प्रज्वलित रहती थी । [१७]

यदा फलं पूर्व-तपःसमाधिना
न तावता लभ्यममंस्त काङ्क्षितम् ।
तदाऽनपेक्ष्य स्व-शरीर-मार्दवं
तप महत्सा चरितुं प्रचक्रमे ॥ १८ ॥

अन्वयः—सा यदा तावता पूर्वतपःसमाधिना काङ्क्षितं फलं लभ्यं न अमंस्त, तदा स्वशरीरमार्दवम् अनपेक्ष्य महत् तपः चरितुं प्रचक्रमे ।

वाच्यपरि०—तया....अमानि,....प्रचक्रमे ।

श०—काङ्क्षित—वाञ्छित । लभ्य—प्रापणीय । अमंस्त—

समझा । मार्दव—सुकुमारता । अनपेक्ष्य—उपेक्षा करके । चरितुम्—सिद्ध करने के लिए । प्रचक्रमे—आरम्भ कर दिया ।

मल्लि०—यदेति । सा देवी । यदा यस्मिन् काले । तावता तावत्प्रमाणेन । (पूर्वतपःसमाधिना) पूर्वेण अनुष्ठीयमानप्रकारेण तपोनियमेन । काङ्क्षितं फलं लभ्यं लब्धुं शक्यम् । न अमंस्त अशक्यम् अमंस्तेत्यर्थः । तदा तत्काले, अविलम्बेन इत्यर्थः । स्वशरीरस्य मार्दवं मृदुत्वं सौकुमार्यम् । अनपेक्ष्य अविगणय्य । महत् दुश्चरम् । तपः चरितुं साधयितुम् , प्रचक्रमे उपचक्रमे ॥ १८ ॥

टि०—तावता—तत् परिमाणमस्येति तावत् तेन, प्राचीन वैयाकरणों ने तत् के आगे डावतु प्रत्यय जोड़कर तावत् शब्द की सिद्धि की है (तद्धितः पा० ४. १. ७६), परन्तु कैयट के मतानुसार तावत् शब्द इस प्रकार अच्छा सिद्ध किया जा सकता है:—तत्+वतुप् और आ दीर्घ कर दिया जाय (आ सर्वनाम्नः पा० ६. ३. ९१) । इसके अर्थ के लिए देखो, यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे । पूर्वतपःसमाधिना—तपः एव समाधिः अथवा तपसा समाधिः तपःसमाधिः (तत्पु०), पूर्वश्चासौ तपःसमाधिः इति पूर्वतपःसमाधिः (कर्म०) तेन । काङ्क्षित—काङ्क्ष्+क्त, अभीष्ट । लभ्य- √लभ् + यत्, प्रापणीय । अमंस्त—√मन् लुङ् । स्वशरीरमार्दवम्—स्वस्याः शरीरस्य मार्दवम् । 'शरीर की सुकुमारता'; मार्दव—मृदोः भावः- मृदु+अण् । अनपेक्ष्य—न अपेक्ष्य, 'परवाह न करके' । अपेक्ष्य—अप+√ईक्ष् + ल्यप् । प्रचक्रमे—प्र+√क्रम् 'आरम्भ करना, + लिट् । जब पार्वती को अपनी तपस्या 'निष्फल होती जान पड़ी' तब उसने और कठोर तपस्या करनी ठान ली ।

हिन्दी—जब उसने प्रथमानुष्ठित तप और नियम से अभीष्ट फल को प्राप्त करना असम्भव समझा तब उसने अपने शरीर की कोमलता की उपेक्षा करके कठोर तप साधना आरम्भ कर दिया । [१८]

क्लमं ययौ कन्दुक-लीलयाऽपि या
तया मुनीनां चरितं व्यगाह्यत ।

ध्रुवं वपुः काञ्चन-पद्म-निर्मितं
मृदु प्रकृत्या च ससारमेव च ॥ १६ ॥

अन्वयः—या कन्दुकलीलया अपि क्लमं ययौ, तया मुनीनां चरितं व्यगाह्यत । ध्रुवं काञ्चनपद्मनिर्मितं वपुः (अत एव) प्रकृत्या मृदु च ससारम् एव च (अभूत्) ।

वाच्यपरि०—यया ....क्लमो यये सा ....व्यगाहत । ....वपुषा काञ्चनपद्मनिर्मितेन मृदुना च ससारेण च एव (अभावि) ।

श०—कन्दुकलीला—गेंद खेलना । क्लम—थकान । चरित—चरित्र । व्यगाह्यत—प्रवेश किया गया । पद्म—कमल । निर्मित—रचित । प्रकृति स्वभाव । ससार—कठिन । मृदु—सुकुमार, कोमल ।

मल्लि०—क्लममिति । या देवी कन्दुकलीलया कन्दुकक्रीडया अपि क्लमं ययौ ग्लानिं प्राप । तया देव्या । मुनीनां चरितं तीव्रं तपः । व्यगाह्यत प्रविष्टम् । अत्र उत्प्रेक्षते—ध्रुवम् अस्याः वपुः (काञ्चनपद्म-निर्मितं) काञ्चनपद्मेन सुवर्णकमलेन निर्मितं घटितम् । अत एव प्रकृत्या पद्मस्वभावेन । मृदु च सुकुमारमपि, काञ्चनस्वभावेन ससारं च कठिनम् एव । तथा च तदुपादानकत्वाद् देव्या वपुषः सुकुमारस्यापि तीव्रतपः-क्षमत्वमित्युत्प्रेक्षार्थः ॥ १६ ॥

टि०—कन्दुकलीलया—कन्दुकस्य कन्दुकेन वा लीला तया, 'गेंद के खेलने से' । पहली पंक्ति द्वारा पार्वती के शरीर की अतीव कोमलता का बोध होता है । देखो, "महार्हशय्यापरिवर्तनच्युतैः" (कुमार० ५. १२) कवि ने यहाँ पार्वती के शरीर की सुकुमारता तथा उसके प्रतिकूल कठोर तपस्या का वर्णन किया है । इन दोनों परस्पर विरोधी भावों पर जो विस्मय उत्पन्न होता है, कवि ने उसे इस प्रकार समझाया है:—स्वर्ण-कमल में जैसे कठोरता तथा सुकुमारता दोनों पाई जाती हैं, वैसे ही उसके शरीर में सुकुमारता तथा कठोरता दोनों विद्यमान थीं । व्यगाह्यत—वि+√गाह् १ आ० लोट् कर्म वाच्य । काञ्चनपद्मनिर्मितम्—काञ्चनस्य पद्मेन निर्मितम्, स्वर्ण कमल द्वारा रचित । ससारम्—सारेण सह वर्तत इति, 'समर्थ, कठिन, ठोस' ।

हिन्दी—जो गेंद खेलती हुई भी परिश्रम को प्राप्त होती थी, वह

(पार्वत अब) मुनियों की कठोर तपस्या करने में प्रवृत्त हुई। अवश्य उसका शरीर सुवर्ण-कमल से बना था और (इसलिए) वह स्वभाव से कोमल तथा समर्थ (सारवान्) था। [१६]

शुचौ चतुर्णां ज्वलतां हविर्भुजां
शुचि-स्मिता मध्य-गता सुमध्यमा।
विजित्य नेत्र-प्रतिघातिनीं प्रभा—
मनन्यदृष्टिः सवितारमैक्षत ॥ २० ॥

अन्वयः—शुचौ शुचि-स्मिता सुमध्यमा (सा पार्वती) ज्वलतां चतुर्णां हविर्भुजां मध्य-गता (सती) नेत्र-प्रतिघातिनीं प्रभां विजित्य अनन्यदृष्टिः (सती) सवितारम् ऐक्षत।

वाच्यपरि०—"''शुचिस्मितया सुमध्यमया अनन्यदृष्ट्या सविता ऐक्ष्यत।

श०—शुचि—ग्रीष्म। ज्वलत्—जलती हुई। हविर्भुज्—आग। शुचि—विशद। स्मित—मुस्कराहट। मध्यगत—मध्य स्थित। नेत्रप्रतिघातिनी—आँखों को चकाचौंध करनेवाली। प्रभा—सूर्य का तेज। अनन्यदृष्टिः—टिकटिकी बाँधकर। सवितारम्—सूर्य को। ऐक्षत—देखती थी।

मल्लि०—शुचाविति। शुचौ ग्रीष्मे। शुचिस्मिता विशदमन्दहासा। सुमध्यमा पार्वती। ज्वलतां दीप्तिमताम्। चतुर्णां हविर्भुजाम् अग्नीनाम्। मध्यगता सती। नेत्रे प्रतिहन्तीति तां नेत्रप्रतिघातिनीम् प्रभां सावित्रं तेजः। विजित्य। न विद्यते अन्यत्र दृष्टिर्यस्याः सा अनन्यदृष्टिः सती सवितारं सूर्यम्। ऐक्षत ददर्श। "ग्रीष्मे पञ्चाग्नि-मध्यस्थो वर्षासु स्थण्डिलेशयः" इति स्मरणात्। पञ्चाग्निमध्ये तपश्चचारेत्यर्थः। सवितैव पञ्चमोऽग्निः, "अग्निः सविता सवितैवाग्निः" इति श्रौतलिङ्गात् ॥ २० ॥

टि०—शुचौ—ग्रीष्म ऋतु में, 'शुचि' का सप्तमी एक०; √शुच्+इन् (इगुपधात् कित् उ० ४. १२०)। इसके कई अर्थ हैं :—

शुचिर्ग्रीष्माग्निशृङ्गारेष्वाषाढे शुद्धमन्त्रिणि।
ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु ॥ मेदिनी

यहाँ पद्य में नपुं० में शुचि का प्रयोग ग्रीष्म के अर्थ में हुआ है और जब यह स्मित का विशेषण बना है तब इसका अर्थ 'विशद' होगा। हविर्भुजाम्—हविः भुञ्जत इति हविर्भुजः तेषाम्, 'आहुतियों को खाने वाली अग्नियों के'। चतुर्णाम्—इससे चारों दिशाओं में स्थापित अग्नि का संकेत किया गया है। ऊपर सिर पर सूर्य पाँचवीं अग्नि का काम देता है, इसे 'पञ्चाग्निसाधन' कहते हैं। शुचिस्मिता—शुचि स्मितं यस्याः (बहु०) सा, 'जिसकी मुस्कराहट विशद हो'। स्मित का अर्थ है, 'ईषद् हसित'। हंसी के भिन्न-भिन्न प्रकारों के लिए देखो,

ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च।
नीचानामपहसितं तथाऽतिहसितञ्च षड्भेदाः॥
ईषद्विकासि नयनं स्मितं स्यात् स्पन्दिताधरम्।
किञ्चिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः॥
मधुरस्वरं विहसितं सांसशिरःकम्पमवहसितम्।
अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितम्॥ साहित्यदर्पण

सुमध्यमा—शोभनः मध्यमः यस्याः सा (बहु०), 'सुन्दर कमर वाली'। नेत्रप्रतिघातिनीम्—नेत्रयोः प्रतिघातिनी, 'आँखों को चकाचौंध कर देनेवाली (प्रभा), ताम्। प्रतिघातिनी—प्रतिहन्तुं शीलम् अस्या इति सा, प्रति+√हन्+णिनि+ङीप्। विजित्य—वि+√जि 'जीतना'+ल्यप्, ल्यप् से पहले तुक् जुड़ जाता है। (ह्रस्वस्य पिति कृति तुक् पा० ६. १. ७१)। अनन्यदृष्टिः—न अन्यस्मिन् दृष्टिः यस्या सा (बहु०)।

हिन्दी—ग्रीष्म ऋतु में जलती हुई चारों ओर होमाग्नि के मध्य बैठी विशद मुस्कराहट वाली कृशोदरी (पार्वती) आँखों को चकाचौंध करनेवाले (सूर्य के) तेज को जीतकर टिकटिकी बाँधे सूर्य को देखती थी। [२०]

तथाभितप्तं सवितुर्गभस्तिभि-
मुखं तदीयं कमलश्रियं दधौ।
अपाङ्गयोः केवलमस्य दीर्घयोः
शनैः शनैः श्यामिकया कृतं पदम्॥ २१॥

अन्वयः—सवितुः गभस्तिभिः तथा अभितप्तं तदीयं मुखं कमलश्रियं दधौ, अस्य (मुखस्य) दीर्घयोः अपाङ्गयोः केवलं श्यामिकया शनैः शनैः पदं कृतम् ।

वाच्यपरि०—....अभितप्तेन तदीयेन मुखेन कमलश्रीः दधे,.... श्यामिका कृतवती ।

श०—गभस्ति—किरण । अभितप्त—सन्तप्त । अपाङ्ग—कोआ । श्यामिका—कालिमा ।

मल्लि०—तथेति । सवितुः सूर्यस्य । गभस्तिभिः किरणैः । तथा पूर्वोक्तप्रकारेण । अभितप्तं सन्तप्तम् । तस्या इदं तदीयम् । मुखं कमलश्रियं कमलस्य शोभाम् दधौ प्राप । यथा रवितापात् कमलं न म्लायति प्रत्युत विकसति तथा तदीयं मुखमासीदिति भावः । किन्तु अस्य मुखस्य । दीर्घयोः अपाङ्गयोः केवलं नेत्रान्तयोरेव । शनैः शनैः मन्दं मन्दम् । श्यामिकया कालिम्ना । पदं स्थानम् कृतम् । तयोः सौकुमार्यादित्यर्थः ॥ २१ ॥

टि०—सवितुः गभस्तिभिः अभितप्तम्—सूर्य की किरणों से लाल हो रहे को; अभितप्त—अभि+√तप्+क्त; उसका मुख, जो कि सूर्य की किरणों से लाल हो रहा था, कमल सदृश सुन्दर प्रतीत हो रहा था, विशेषतया रक्त कमल से यहाँ तात्पर्य है । यद्यपि कवि ने यहाँ किसी कमल विशेष का उल्लेख नहीं किया है, तथापि लाल हो रहे मुख के साथ तुलना करने से प्रतीत होता है कि कवि का अभिप्राय रक्त कमल से है । हर्ष ने नागानन्द में मलयवती के लाल मुख और कमल में सदृशता दिखाई है :—

एतन्मुखं प्रियायाः शशिनं क्षिप्त्वा कपोलयोः कान्त्या ।
तापानुरक्तमधुना कमलं भृशमीहते जेतुम् ॥ ३. १०.

अंगरेजी के कवियों ने प्रायः स्त्री के लाल मुख की तुलना लाल गुलाब से की है । अस्य—इसका सम्बन्ध 'मुख' से है । दीर्घयोः अपाङ्गयोः—'लम्बे कोयों से', 'दीर्घयोः' विशेषण से सुन्दरता का बोध होता है, लम्बे कोये सुन्दरता के सूचक हैं । श्यामिकया—कालिमा द्वारा ।

'केवलम्' द्वारा कालिमा के घेरे को कोयों तक सीमित किया गया है।

हिन्दी—सूर्य की किरणों से उस प्रकार अति सन्तप्त उसके मुख ने कमल की शोभा को धारण किया, (परन्तु) उसके विस्तृत (नेत्रों के) कोयों पर धीरे-धीरे कालिमा ने स्थान बना लिया। [२१]

अयाचितोपस्थितमम्बु केवलं
रसात्मकस्योडुपतेश्च रश्मयः।
बभूव तस्याः किल पारणाविधि—
र्न वृक्षवृत्तिव्यतिरिक्तसाधनः॥ २२॥

अन्वयः—अयाचितोपस्थितं केवलम् अम्बु रसात्मकस्य उडुपतेः रश्मयः च तस्याः पारणाविधिः बभूव किल, वृक्षवृत्तिव्यतिरिक्तसाधनः न (बभूव)।

वाच्यपरि०—अयाचितोपस्थितेन केवलेन अम्बुना.......रश्मिभिः ....पारणाविधिः न बभूवे, वृक्षवृत्तिव्यतिरिक्तसाधनेन न (बभूवे)।

श०—अयाचित—बिना माँगे। उपस्थित—प्राप्त। अम्बु—जल। रसात्मक—अमृतरस-मय। उडुपति—चन्द्रमा, तारागण का स्वामी। रश्मि—किरण। पारणा—व्रत-समाप्ति पर भोजन। वृत्ति—जीवनोपाय। व्यतिरिक्त - पृथक्। साधन—उपात।

मल्लि०—अयाचितेति। अयाचितोपस्थितम् अप्रार्थितोपनतम्। केवलम् अम्बु उदकम्। रसात्मकस्य अमृतमयस्य। (उडुपतेः) उडूनां नक्षत्राणां पतिः चन्द्रः, तस्य। रश्मयः च तस्याः पार्वत्याः। पारणाविधिः अभ्यवहारकर्म बभूव, तावन्मात्रसाधनकोऽभूत् इत्यर्थः। साध्यसाधनयोः अभेदेन व्यपदेशः साधनान्तरव्यावृत्त्यर्थः। किल इति प्रसिद्धौ। (वृक्षवृत्तिव्यतिरिक्तसाधनः) वृक्षाणां या वृत्तिः जीवनोपायः, तद्व्यतिरिक्तं साधनम् उपायो यस्य स तथोक्तः पारणाविधिः न बभूव। वृक्षोऽपि अयाचितोपस्थितेन मेघोदकेन इन्दुकिरणैश्च जीवतीति प्रसिद्धम्, अम्बिकाऽपि तावन्मात्रम् अवालम्बतेत्यर्थः॥ २२॥

टि०—अयाचितोपस्थितम्—न याचितम् अयाचितम् (नञ् तत्पु०), अयाचितं च तदुपस्थितं चेति तत् (कर्म०), जो उसे बिना

माँगे प्राप्त हुआ था। इसका सम्बन्ध अम्बु (नपुं०) से है। **रसात्मकस्य**—रसः आत्मा यस्य सः (बहु०), 'अमृतमय अथवा जलमय,' तस्य। कप् प्रत्यय विकल्प रूप में रसात्मन् को जोड़ा गया है अर्थात् जो बहुव्रीहि समास का उत्तर भाग है। (शेषाद्विभाषा पा० ४. ४. १५४) । **उडुपतेः**—उडूनां पतिः उडुपतिः, 'ताराओं का स्वामी', तस्य, अर्थात् चन्द्रमा। देखो, ताराधिप। चन्द्रमा को रसात्मक कहा है क्योंकि यह जल अथवा अमृत से युक्त है। वराहमिहिर ने बताया है कि चन्द्रमा जल से बना है:—

सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम्।
क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः॥

अमृत से युक्त होने के कारण चन्द्रमा को सुधाकर कहा जाता है। **वृक्षवृत्तिव्यतिरिक्तसाधनः**—वृक्षाणां वृत्तेः व्यतिरिक्तं साधनं यस्य सः (बहु०), वृक्ष केवल ओस की बूँदों तथा चन्द्र-किरणों पर निर्वाह करते हैं। पार्वती का भोजन भी वृक्षों के भोजन से भिन्न नहीं था।

हिन्दी—बिना प्रार्थना किये प्राप्त हुआ केवल (वर्षा का) जल और अमृत-रसमय चन्द्रमा की किरणों से उसकी पारणा होती थी, वृक्षों की जीविका से उसका जीवनोपाय भिन्न न था। [२२]

निकाम-तप्ता विविधेन वह्निना
नभश्चरेणेन्धन-सम्भृतेन सा।
तपात्यये वारिभिरुक्षिता नवै-
*र्भुवा सहोष्माणममुञ्चदूर्ध्वगम् ॥ २३ ॥**

अन्वयः—विविधेन नभश्चरेण इन्धनसम्भृतेन वह्निना निकामतप्ता सा तपात्यये नवैः वारिभिः उक्षिता भुवा सह ऊर्ध्वगम् ऊष्माणम् अमुञ्चत्।

वाच्यपरि०—....निकामतप्तया तया....उक्षितया....ऊर्ध्वगः ऊष्मा अमुच्यत।

श०—नभश्चर—सूर्य, अर्थात् आकाश में विचरने वाला। विविध—अनेक प्रकार। इन्धन—जलाने की लकड़ी। सम्भृत—समिद्ध, जलाई-हुई। वन्हि—आग। निकाम—अत्यन्त। तप—ग्रीष्म। अत्यय—अन्त। उक्षित—सिक्त। ऊष्मन्—वाष्प। ऊर्ध्वग—ऊपर उठ रही।

मल्लि०—निकामेति। विविधेन पञ्चविधेन इत्यर्थः। नभश्चरेण खेचरेण आदित्यरूपेण इत्यर्थः। इन्धनसम्भृतेन काष्ठसमिद्धेन वह्निना। (निकामतप्ता) निकामम् अत्यन्तं तप्ता। सा अम्बिका। तपात्यये ग्रीष्मान्ते प्रावृषीत्यर्थः। नवैर्वारिभिः उक्षिता सिक्ता सती। भुवा पञ्चाग्नितप्तया। सह ऊर्ध्वम् ऊर्ध्वप्रसृतम्। ऊष्माणं वाष्पम्। अमुञ्चत् "ग्रीष्मोष्मवाष्प ऊष्माणः" इति यादवः॥ २३॥

टि०—विविधेन—अनेक प्रकार की अर्थात् पाँच प्रकार की। इसका सम्बन्ध 'पञ्चाग्निसाधन' से है, जैसा कि पद्य २० में वर्णन किया गया है। पाँच प्रकार की अग्नि के दो भाग हैं:—नभश्चर और इन्धनसम्भृत। नभश्चरेण—नभसि चरतीति नभश्चरः (उपपद०) तेन, 'सूर्य द्वारा, जो कि आकाश में विचरता है'। इन्धनसम्भृतेन—इन्धनेन सम्भृत इति इन्धनसम्भृतः (तृतीयातत्पु०) तेन, 'इन्धन से जलाई गई'; इसका सम्बन्ध उन चार अग्नियों से है जो पार्वती के चारों ओर जलाई गई थीं, जब वह तप कर रही थी। तपात्यये—तपस्य अत्यये (षष्ठीतत्पु०), 'ग्रीष्म के अन्त पर'। देखो, 'निदाघ उष्णोपगम उष्ण उष्मागमस्तपः।' अमर। उक्षिता—√उक्ष्+क्त, सिक्त। भुवा सह–पृथ्वी के साथ; सह आदि के साथ तृतीया विभक्ति लगती है। (सहयुक्तेऽप्रधाने पा० २. ३. १९)। ऊर्ध्वगम्—ऊर्ध्वं गच्छतीति (उपपद०) 'जो ऊपर जाती है', तम्। कवि के कहने का तात्पर्य यह है कि पृथ्वी की भाँति पार्वती की देह सूर्य से इतनी गरम हो गई थी कि उससे भाप निकलने लगी थी जो ऊपर को उठ रही थी। पृथ्वी भी जब सूर्य द्वारा गरम और बादलों से गीली हो जाती है तब यह भाप छोड़ने लगती है। इसी प्रकार पार्वती की देह पाँच अग्नियों द्वारा गरम और पसीने से गीली हो जाने पर भाप छोड़ने लगी थी और वह भाप (निःश्वास) ऊपर को उठ रही थी।

हिन्दी—अनेक प्रकार की, सूर्य से तथा इन्धन द्वारा जलाई हुई, अग्नियों से अत्यन्त सन्तप्त हुई वह (पार्वती) ग्रीष्म-काल के अन्त में (अर्थात् वर्षा ऋतु में) नवीन वर्षा के जल से भीगी हुई भूमि के साथ ऊपर उठ रही भाप (निःश्वास) को छोड़ने लगी। [२३]

स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ॥ २४ ॥

अन्वयः—प्रथमोदबिन्दवः तस्याः पक्ष्मसु क्षणं स्थिताः (ततः) ताडिताधराः (ततः) पयोधरोत्सेधनिपातचूर्णिताः (ततः) वलीषु स्खलिताः (एवं) चिरेण नाभिं प्रपेदिरे ।

वाच्यपरि०—प्रथमोदविन्दुभिः....स्थितैः ताडिताधरैः पयोधरोत्सेध-निपातचूर्णितैः....स्खलितैः नाभिः प्रपेदे ।

श०—उदविन्दु—जल-बिन्दु । पक्ष्म—पलक । उत्सेध—अत्युच्च, उपरिभाग । वली—उदर-रेखा । स्खलिताः—लुढ़कीं, गिरीं । नाभि—तुन्दि ।

मल्लि०—स्थिता इति । (प्रथमोदबिन्दवः) उदकस्य बिन्दवः उदबिदवः, "मन्थौदन" इत्यादिना उदकशब्दस्य उदादेशः । प्रथमे उदबिन्दवः, प्रथमविशेषणाद् बिन्दूनां विरलत्वं बहुवचनात् न अतिविरल-त्वञ्च गम्यते । तथा च चिरत्वनाभ्यन्तरगमनयोर्निर्वाहः । तस्याः पार्वत्याः । पक्ष्मसु नेत्रलोमसु । क्षणं स्थिताः स्थितिं गताः, स्थिता इत्यनेन पक्ष्मणां सान्द्रत्वं क्षणमिति स्नैग्ध्यञ्च गम्यते । अनन्तरं (ताडिताधराः) ताडितः व्यथितः अधरः ओष्ठः यैः ते तथोक्ताः, एतेन अधरस्य मार्दवं गम्यते । ततः (पयोधरोत्सेधनिपातचूर्णिताः) पयोधरयोः स्तनयोः उत्सेधे उपरिभागे निपातेन पतनेन चूर्णिताः जर्जरिताः कुचकाठिन्या-दिति भावः । तदनु वलीषु उदररेखासु स्खलिताः, निम्नोन्नतत्वादिति भावः । इत्थं चिरेण न तु शीघ्रम्, प्रतिबन्धबाहुल्यादिति भावः । नाभिं प्रपेदिरे प्रविष्टाः, न तु निर्जग्मुः । एतेन नाभेर्गाम्भीर्यं गम्यते । अत्र प्रतिपदमर्थवत्त्वात् परिकरालङ्कारः ॥ २४ ॥

टि०—उदबिन्दवः—उदकस्य बिन्दवः (षष्ठीतत्पु०), जल-बिन्दु । 'उदक' शब्द के बाद यदि बिन्दु आदि शब्द आयें तो उदक उद में बदल जाता है । (मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च पा० ६. ३. ६) । पक्ष्मसु—पलकों पर । जल की बूँदों का पार्वती के पलकों पर क्षण भर

रुकने से बोध होता है कि उसकी पलकें कितनी घनी और कोमल थीं। ताडिताधराः—ताडितः अधरः यैः ते (बहु०), जिन्होंने निचले होंठ को पीड़ित किया। 'ताडित' शब्द द्वारा पार्वती के निचले होंठ की कोमलता का बोध होता है, इसी कारण तो वह जल-बिन्दु से भी पीड़ित हुआ। पयोधरोत्सेधनिपातचूर्णिताः—पयोधरयोः उत्सेधे निपातेन चूर्णिताः, ऊपर उठी छातियों पर गिरने से (वह जल-बिन्दु) छिटक गये। इससे उसकी छाती की कठोरता विदित होती है। बलीषु स्खलिताः—उदर-रेखाओं में लुढ़क जाती थीं। नाभिं प्रपेदिरे—नाभि को पहुँचती थीं। प्र + √ पद् का अर्थ होता है 'ठहरना', जल की बूँदें नाभि-स्थल पर पहुँचती थीं, और उसमें समा जाती थीं। इससे उसकी नाभि की गम्भीरता विदित होती है। नाभि की गम्भीरता स्त्रियों का आभूषण है। विश्वनाथ ने इस पद्य को पर्याय के उदाहरण के रूप में उद्धृत किया है।

क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात्।
भवति क्रियते वा चेत् तदा पर्याय इष्यते॥

अर्थात् "जब एक ही वस्तु है या अनुक्रम में कई स्थानों पर बनाई जाती है अथवा जब कई वस्तुएँ हैं या अनुक्रम में एक ही स्थान पर बनाई जाती हैं, तब यह पर्यायालङ्कार कहलाता है।"

यहाँ पर एक वस्तु, अर्थात् वर्षा की बूँदें क्रमानुसार पार्वती के पलक, निचला होंठ, छाती, उदर-रेखा तथा नाभि पर गिरती दिखाई गई हैं। वर्षा की बूँदें क्रमशः पार्वती के पलक आदि पर स्थित दिखाई देती हैं, और यह सब पृथक्-पृथक् वस्तुएँ हैं न कि एक वर्ग व समुदाय।

हिन्दी—वर्षा की पहली बूँदें उसके पलकों पर क्षण भर ठहर कर वहाँ से निचले होंठ पर गिरीं, (तदनन्तर) स्तन के ऊपरि भाग पर गिरने से जर्जर होकर पेट की रेखाओं से लुढ़कती हुई बहुत देर में नाभि तक पहुँचीं। [२४]

शिलाशयां तामनिकेत-वासिनीं
निरन्तरास्वन्तर - वातवृष्टिषु।

व्यलोकयन्नुन्मिषितैस्तडिन्मयै-
 र्महातपःसाक्ष्य इव स्थिताः क्षपाः ॥ २५ ॥ *

अन्वयः—निरन्तरासु अन्तरवातवृष्टिषु अनिकेतवासिनीं शिलाशयां तां महातपःसाक्ष्ये स्थिता इव क्षपाः तडिन्मयैः उन्मिषितैः व्यलोकयन् ।

वाच्यपरि०—....स्थिताभिः क्षपाभिः अनिकेतवासिनी शिलाशया.... सा व्यलोक्यत ।

श०—निरन्तर—लगातार । वृष्टि—वर्षा । अन्तर—बीच । वात—वायु । निकेत—घर । अनिकेतवासिनी—खुले में (बिना घर के) रहनेवाली । शिलाशया—चट्टान पर जो सोती थी । साक्ष्य—गवाही । क्षपा—रात्रि । उन्मिषित—दृष्टि । तडिन्मय—विद्युन्मय ।

मल्लि०—शिलेति । निरन्तरासु नीरन्ध्रासु । अन्तरे मध्ये वातो यासां तादृश्यो या वृष्टयस्तासु अन्तरवातवृष्टिषु । न निकेते गृहे वसतीति ताम्, अनिकेतवासिनीम् अनावृतदेशवासिनीमित्यर्थः । शिलायां शेते इति शिलाशयां शिलातलशायिनीम्, "अधिकरणे शेतेः" इति अच्प्रत्ययः । तां पार्वतीं (महातपःसाक्ष्ये) साक्षाद् द्रष्टा साक्षी, "साक्षाद् द्रष्टरि संज्ञायाम्" इति इनि प्रत्ययः; तस्य कर्म साक्ष्यम् महातपसः साक्ष्ये स्थिताः क्षपाः तडिन्मयैः विद्युद्रूपैः । उन्मिषितैः अवलोकनैः । व्यलोकयन् इव । इवेति चक्षुषा विलोकनमेव उत्प्रेक्ष्यते । साक्ष्यं तु—इति प्रमाणसिद्धत्वान्नोत्प्रेक्ष्यमित्यनुसन्धेयम् ॥ २५ ॥

"आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् ॥"

टि०—निरन्तरासु—निर्गतम् अन्तरं याभ्यः ताः निरन्तराः (बहु०), तासु, 'लगातार' । अन्तरवातवृष्टिषु—अन्तरे वातो यासां ताः अन्तरवाताः (बहु०), अन्तरवाताश्च ता वृष्टयः इति अन्तरवातवृष्टयः (कर्म०), तासु, तेज हवा के साथ-साथ वर्षा । अनिकेतवासिनीम्—न निकेते वसतीति अनिकेतवासिनी, ताम्, खुले में (बिना घर के) रहने वाली; वासिनी—√वस् 'रहना'+णिनि (इन्)+ ङीप् । शिलाशयाम्—शिलायां शेत इति शिलाशय (सप्तमीतत्पु०), ताम् :शिला +√शी २ आ०+अच्

(अधिकरणे शेतेः पा० ५. २. १५), शिला पर सोने वाली को।
महातपःसाद्ये—साक्षिणः कर्म साक्ष्यं (साक्षिन्+ष्यञ्), महच्चेदं तपः महत्तपः, तस्य साक्ष्यं तस्मिन्, महान् तपस्या की साक्षी रूप। तडिन्मयैः—तडित् + मयट् (तत्प्रकृतवचने मयट् पा० ५. ४. २१), विद्युत् रूप। उन्मिषितैः—उत्+√मिष् 'पीना'+क्त, खुले नेत्रों द्वारा।

पहली दो पंक्तियाँ पार्वती की कठोर तथा तीव्र तपस्या को सूचित करती हैं और पिछली दो पंक्तियाँ रातों को साकार बताती है जिससे वे बिजली रूपी अपनी आँखों से उसे देखती थी।

हिन्दी—लगातार और बीच-बीच में तेज हवा के साथ-साथ वर्षा में जो खुले हुए स्थान पर रहती और शिला पर सोती थी, उसके महातप की साक्षिभूत रात्रियाँ मानो विद्युत् रूपी दृष्टियों से उसे देखती थीं। [२५]

निनाय साऽत्यन्त-हिमोत्किरानिलाः
सहस्य - रात्रीरुदवास - तत्परा।
परस्पराक्रन्दिनि चक्रवाकयोः
पुरो वियुक्ते मिथुने कृपावती ॥ २६ ॥

अन्वयः—सा पुरः परस्पराक्रन्दिनि वियुक्ते चक्रवाकयोः मिथुने कृपावती (सती) अत्यन्तहिमोत्किरानिलाः सहस्यरात्रीः उदवासतत्परा निनाय।

वाच्यपरि०—तया .... उदवासतत्परया .... कृपावत्या (सत्या) सहस्यरात्रयः निन्यिरे।

श०—हिम—बर्फ। उत्किर—बिखेरना। अनिल—वायु। सहस्य—पौष। उदवास—जल में खड़े रहना। आक्रन्दिन्—चिल्ला रहे। चक्रवाक—चकवा। मिथुन—जोड़ा। कृपावती—दयावती।

मल्लि०—एवं वर्षासु विहितं तपःप्रकारमुक्त्वा सम्प्रति हेमन्ते तपश्चरणप्रकारमाह—निनायेति। सा पार्वती (अत्यन्तहिमोत्किरानिलाः) उत्किरन्ति क्षिपन्तीत्युत्किराः, "इगुपधज्ञा" इत्यादिना कः। अत्यन्तं हिमानाम् उत्किराः अनिलाः यासु ताः सहस्यरात्रीः पौषरात्रीः, "पौषे तैषसहस्यौ द्वौ" इत्यमरः। (उदवासतत्परा) उदके वासः उदवासः।

"पेषंवासवाहनाधिषु च" इत्युदादेशः; उदवासे तत्परा आसक्ताः तथा। (परस्पराक्रन्दिनि) परस्परमाक्रन्दिनि अन्योन्यमाक्रोशिनी। पुरः अग्रे ना वियुक्ते विरहिणि, वियोगं प्राप्त इति यावत्, चक्रवाकी च चक्रवाकश्च चक्रवाकौ तयोः चक्रवाकयोः। मिथुने द्वन्द्वे। कृपावती सती निनाय। दुःखिषु कृपालुत्वं महतां स्वभाव इति चक्रवाकमिथुने कृपा, न तु कामितया इति वाच्यानवकाशः। "अप्सु वासस्तु हेमन्ते क्रमशो वर्धयेत्तपः" इति मनुः ॥ २६ ॥

टि० — अत्यन्तहिमोत्किरानिलाः—अत्यन्तं हिमानाम् उत्किराः अनिलाः यासु (बहु०) ताः, 'जिसमें हवायें ढेरों बर्फ बिखेरती थीं;' उत्किराः— उत् + कृ + क (इगुपधज्ञाप्रीकिरः कः पा० ३. १. १३५) 'बिखेरना'। यह सारा समास 'सहस्यरात्रीः' के साथ लगेगा। सहस्यरात्रीः—सहस्यस्य रात्रीः (षष्ठीतत्पु०), पौष की रातें; सहस्य शब्द विशेष रूप से पौष के लिए प्रयुक्त किया गया है। देखो, 'पौषे तैषसहस्यौ द्वौ' अमर। किन्तु यहाँ पर वह सरदी के लिए प्रयुक्त हुआ है। उदवासतत्परा— उदके वासः उदवासः (तत्पु०), स परो यस्याः (बहु०) सा तत्परा, उदवासे तत्परा इति सा, 'जल में खड़े रहने पर जुटी'। परस्पराक्रन्दिनि— परस्परम् आक्रन्दतीति तत् परस्पराक्रन्दि (नपुं०) तस्मिन्। यह 'मिथुने' के साथ लगेगा। परस्पर—यह समास नहीं लिया जायगा, देखो, 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्' (वार्त्तिक) अर्थात् सर्वनाम शब्द का द्वित्व हो जाता है जब परस्पर कार्य या कार्य का अदल बदल सूचित होता है और इस प्रकार का बना शब्द विकल्प में समास होता है। 'पर' और 'अन्य' का समास नहीं होता जैसा कि भट्टोजी दीक्षित ने कहा है:—'बहुलग्रहणादन्यपरयोर्न समासवत् इतरशब्दस्य तु नित्यम्'। चक्रवाकयोः—चक्रवाकी च चक्रवाकश्चेति चक्रवाकौ (एकशेषद्वन्द्व); तयोः। चक्रवाक और चक्रवाकी रात के समय बिछुड़ जाते हैं और एक दूसरे के वियोग में रो-रोकर रात व्यतीत करते हैं। कहा जाता है कि वे दोनों किसी जलाशय व नदी तट अथवा सरोवर के आमने-सामने तटों पर बैठ कर रात व्यतीत करते हैं। वे एक दूसरे के चिल्लाने की आवाज

सुनते हैं परन्तु एक दूसरे के पास उड़ कर जा नहीं सकते। इस प्रकार रात में उनका मिलना असम्भव रहता है। देखो,

एषापि प्रियेण विना गमयति रजनी विषाददीर्घतराम्। शाकुन्तल

कृपावती—शिव के लिए छटपटा रहा पार्वती का हृदय चकवा-चकवी के दुखी जोड़े के साथ सहानुभूति रखता है।

हिन्दी—पूष की उन रातों को, जिनमें हवायें ढेरों वर्फ विखेरती थीं, वह (पार्वती) जल में तन्मय भाव से खड़े होकर (ही) व्यतीत करती थी और सामने बिछुड़े हुए एक दूसरे को लक्ष्य करके चिल्लानेवाले चकवे के जोड़े पर दया दिखाती थी। [२६]

मुखेन सा पद्म-सुगन्धिना निशि
प्रवेपमानाधर-पत्र-शोभिना।
तुषार-वृष्टि-क्षत-पद्म-सम्पदां
सरोज-संधानमिवाकरोदपाम् ॥ २७ ॥

अन्वयः—सा निशि पद्म-सुगन्धिना प्रवेपमानाधर-पत्र-शोभिना मुखेन तुषार-वृष्टि-क्षत-पद्म-सम्पदाम् अपां सरोज-संधानम् अकरोत् इव।

वाच्यपरि०—तया....अक्रियत।

श०—निशा—रात्रि। प्रवेपमान—काँप रहे। अधर-पत्र—पत्ते का-सा होंठ। तुषार—वर्फ। वृष्टि—वर्षा। क्षत—नाशित। सम्पत्—सम्पत्ति। सरोज—कमल। संधान—संयोग।

मल्लि०—मुखेनेति सा पार्वती। निशि रात्रौ। (पद्मसुगन्धिना) पद्मवत् सुगन्धिना सुरभिणा, "गन्धस्येत्" इत्यादिना इकारः। (प्रवेपमानाधरपत्रशोभिना) प्रवेपमानः कम्पमानः अधर ओष्ठ एव पत्रं दलम्, तेन शोभते इति। तथोक्तेन मुखेन, (तुषारवृष्टिक्षतपद्मसंपदां) तुषारवृष्ट्या तुहिनवर्षेण क्षता नाशिताः पद्मसम्पदः यासां तासाम्। अपां सरोजसन्धानं पद्मसङ्घटनम्। अकरोत् इव इत्युत्प्रेक्षालङ्कारः। पद्मान्तरं तुहिनेन उपहन्यते तन्मुखपद्मन्तु न तथेति व्यतिरेकालङ्कारो व्यज्यत इत्युभयोः सङ्करः॥ २७॥

टि०—पद्मसुगन्धिना—शोभनो गन्धो यस्मिन् तत् सुगन्धि, पद्मेन इव सुगन्धिना इति पद्मसुगन्धिना, 'कमल की सुगन्ध द्वारा', गन्ध

शब्द गन्धि में बदल जाता है यदि उत्, पूति आदि बाद में हो। (गन्धस्येदुत्पूतिसुसुरभिभ्यः पा० ५. ४. १३५)। प्रवेपमानाधरपत्रशोभिना—प्रकर्षेण वेपमानः अधरः एव पत्रं तेन शोभत इति तेन, 'काँप रहे कोमलपत्र रूपी निचले होंठ से शोभायमान'। तुषारवृष्टिक्षतपद्मसम्पदाम्—तुषारवृष्ट्या क्षता पद्मसम्पत् यासां (बहु०) तासाम्, बर्फ़ की वर्षा से कमलों की सम्पत्ति जिनकी नष्ट कर दी गई है। सरोजसन्धानम्—सरोजानां सन्धानम्, 'कमलों का संयोग'। बर्फ़ की वर्षा से जलाशय कमल रहित हो जाते थे, पर वे पार्वती के मुख-रूपी कमल से शोभायमान प्रतीत होते थे, क्योंकि पार्वती का मुख कमल-सा सुगन्धित था और उसका अधरोष्ठ कमल-दल के समान काँप रहा था।

हिन्दी—वह रात के समय कमल सदृश सुगन्धित और काँप रहे कमल-पत्र रूपी अधरोष्ठ से शोभायमान मुख से बर्फ की वर्षा द्वारा नष्ट हुई कमलरूपी सम्पदावाले जलों में मानो (पुनः) कमल का संयोग करती थी। [२७]

स्वयं-विशीर्ण-द्रुम-पूर्ण-वृत्तिता
परा हि काष्ठा तपसस्तया पुनः।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः॥ २८॥

अन्वयः—स्वयंविशीर्णद्रुमपर्णवृत्तिता तपसः परा काष्ठा हि। पुनः (किन्तु) तया तदपि अपाकीर्णम्। अतः प्रियंवदां तां पुराविदाः अपर्णा इति च वदन्ति।

वाच्यपरि०—स्वयंविशीर्णद्रुमपर्णवृत्तितया....परया काष्ठया (भूयते)....सा....अपाकीर्णवती।....पुराविद्भिः....सा उच्यते।

शा०—विशीर्ण—झड़े हुए। द्रुम—वृक्ष। पर्ण—पत्र। वृत्ति—जीविका। परा—परम। काष्ठा—उत्कर्ष। अपाकीर्ण—परित्यक्त, अस्वीकृत। पुराविद्—पुरातत्त्ववेत्ता। प्रियंवदा—मधुरभाषिणी। अपर्णा—पत्तों के बिना।

टि०—स्वयमिति। (स्वयंविशीर्णद्रुमपर्णवृत्तिता) स्वयं

विशीर्णानि स्वतश्च्युतानि द्रुमपर्णानि एव वृत्तिः जीवनं यस्य तस्य भावस्तत्ता। तपसः परा काष्ठा परमुत्कर्षो हि "काष्ठोत्कर्षे स्थितौ दिशि" इत्यमरः। तया देव्या। पुनः तत् पर्णवर्तनम् अपि अपाकीर्णम् अपाकृतम् अतः पर्णापाकरणाद्धेतोः। (प्रियंवदां) प्रियं वदतीति प्रियंवदा "प्रियवशे वदः खच्" इति खच् प्रत्ययः, "अरुर्द्विषदजन्तस्य मुम्" इति मुमागमः। तां पार्वतीम्। पुराविदः पुराणज्ञाः। तपः करणसमये अविद्यमानं पर्णभक्षणं यस्याः सा अपर्णा इति वदन्ति, नामान्तरसमुच्चयार्थश्चकारः। स्वयं प्रियंवदाः परेषामपि प्रियवादभाजनानि भवन्तीति भावः। अत्रापर्णामित्यपपाठः, इतिशब्दाभिहिते द्वितीयानुपपत्तेः। यथाह वामनः–निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः, परिगणनस्य प्रायिकत्वात्" इति॥ २८॥

टि०—स्वयंविशीर्णवृत्तिता—स्वयं विशीर्णानि द्रुमाणां पर्णान्येव वृत्तिः यस्मिन् तस्य भावस्तत्ता, स्वयमेव वृक्षों से गिरे हुए पत्तों पर जीविका; विशीर्ण–वि+√शॄ+क्त। परा काष्ठा–परम सीमा। अपाकीर्ण—परित्यक्त, अस्वीकृत; अप + आ+√ कॄ 'बिखेरना'+ क्त; यह रूप विशीर्ण की भाँति बना है। अप और आ उपसर्गों के साथ √कॄ का अर्थ बदल गया है (उपसर्गेण धात्वर्थो बलादन्यत्र नीयते)। पुराविदः—पुरा तत्त्वं विदन्तीति ते, पुराविद्+ क्विप्, पुरातत्त्ववेत्ता। प्रियंवदाम्—प्रियं वदन्तीति; प्रिय +√वद् +खच् (प्रियवशे वदः खच् पा० ३. २. ३८), प्रिय के पश्चात् मुम् जोड़ा जाता है। (अरुर्द्विषदजन्तस्य मुम् पा० ६. ३. ६७)। अपर्णा—नास्ति पर्णभक्षणं यस्याः सा अपर्णा (मध्यमपदलोपी बहु०), ताम्। कुछ लोग यहाँ 'अपर्णाम्' पढ़ते हैं किन्तु व्याकरण की दृष्टि से यह पाठ अशुद्ध है, क्योंकि 'इति' अव्यय द्वारा कर्म सूचित किया गया है, सो यहाँ कर्म विभक्ति होगी। देखो, वामनः—निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः, परिगणनस्य प्रायिकत्वात्।'

हिन्दी—वृक्षों के स्वयं झड़े हुए पत्तों पर निर्वाह करना तपस्या का परम उत्कर्ष है। परन्तु उसने वह भी ग्रहण न किया, और

इसलिए उस प्रियवादिनी (पार्वती) को पुरातत्त्व के ज्ञाता 'अपर्णा' नाम से पुकारते हैं। [२८]

मृणालिका - पेलवमेवमादिभि-
र्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम्।
तपः शरीरैः कठिनैरुपार्जितं
तपस्विनां दूरमधश्चकार सा ॥ २९ ॥

अन्वयः—मृणालिका-पेलवं स्वम् अङ्गम् एवमादिभिः व्रतैः अहर्निशं ग्लपयन्ती सा कठिनैः शरीरैः उपार्जितं तपस्विनां तपः दूरम् अधश्चकार।

वाच्यपरि०—"ग्लपयन्त्या तया...अधश्चक्रे।

श०—मृणालिका—कमल-नाल। पेलव—कोमल। व्रत—यम-नियम। अहर्निशम्—दिन-रात। ग्लपयन्ती—क्षीण करती हुई। कठिन—दृढ़। अधश्चकार—नीचा दिखाया।

मल्लि०—मृणालिकेति। मृणालिकापेलवं पद्मिनीकन्दकोमलं स्वं स्वकीयम्। अङ्गम् शरीरम्। एवम् आदिभिः एवमुक्तप्रकारतोयाग्निमध्यवासव्रतमादिर्येषां तैः व्रतैः। अहश्च निशा च अहर्निशम् समाहारे द्वन्द्वैकवद्भावः। अत्यन्तसंयोगे द्वितीया। ग्लपयन्ती कर्शयन्ती सा पार्वती। कठिनैः क्लेशसहैरित्यर्थः। शरीरैः उपार्जित सम्पादितं तपस्विनाम् ऋषीणाम् तपः दूरम् अत्यन्तम् अधश्चकार तिरश्चकार अतिशिश्ये इत्यर्थः। तपस्विभिरपि एवं तपः कर्त्तुं न शक्यत इति तात्पर्यार्थः ॥ २९ ॥

टि०—मृणालिकापेलवम्—मृणालिका इव पेलवम् (कर्म०), 'कमल-नाल सदृश कोमल'। इसका सम्बन्ध 'अङ्गम्' से है। यहाँ इसके शरीर की कोमलता की तुलना कमल-नाल की कोमलता से की गई है। देखो, अनेन कल्याणि ! मृणालकोमलं व्रतेन गात्रं ग्लपयस्यहर्निशम्। विक्रम०

एवमादिभिः—एवम् आदिः येषाम् (बहु०) ते एवमादयः, तैः। इससे पार्वती की विविध कठोर तपस्याओं का बोध होता है। अहर्निशम्—(अव्यय) अहश्च निशा चेति (समाहारद्वन्द्व), 'दिन-रात' दिन और रात का सम्बन्ध निकटतम होने के कारण यहाँ द्वितीया का प्रयोग

किया गया है। (कालाध्वनोरत्यन्तसंयोगे पा० २. ३. ५)। ग्लपयन्ती—√ग्लै १ पर० 'क्षीण होना'+णिच्+शतृ+ङीप्, 'क्षीण करती हुई'। पद्य में बताया गया है कि पार्वती ने अपने कोमल शरीर से ऐसी कठोर तपस्या की कि दृढ़ शरीरधारी तपस्वी पुरुष भी वैसी तपस्या करने में असमर्थ थे। यहाँ व्यतिरेक अलङ्कार है क्योंकि उपमेय उपमान से बढ़ जाता है।

हिन्दी—कमल-नाल के समान कोमल अपने शरीर को उसने इस प्रकार दिन-रात व्रत आदि से क्षीण किया और दृढ़ देहों द्वारा संचित की तपस्वियों की तपस्या को नीचा दिखा दिया। [२९]

अथाजिनाषाढ-धरः प्रगल्भ-वाग्
ज्वलन्निव ब्रह्ममयेन तेजसा।
विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा ॥ ३० ॥ *

अन्वयः—अथ अजिनाषाढधरः प्रगल्भवाक् ब्रह्ममयेन तेजसा ज्वलन् इव कश्चित् जटिलः शरीरबद्धः प्रथमः यथा तपोवनं विवेश।

वाच्यपरि०—....अजिनाषाढधरेण प्रगल्भवाचा....ज्वलता....केनचित् जटिलेन शरीरबद्धेन प्रथमाश्रमेण इव....विविशे।

श०—अजिन—काली मृगछाला। आषाढ—पालाश-दण्ड। प्रगल्भवाक्—वाक्पटु। ज्वलन्—दीप्तिमान। तेजस्—ब्रह्म-तेज। जटिल—जटाधारी। शरीरबद्ध—मूर्तिमान। प्रथमाश्रम—ब्रह्मचर्याश्रम।

मल्लि—अथेति। अथ अनन्तरम्। अजिनाषाढधरः अजिनं कृष्णमृगत्वक्। आषाढः प्रयोजनमस्येति आषाढः पालाशदण्डः, "पालाशो दण्ड आषाढः" इत्यमरः। "विशाखाषाढादण् मन्थदण्डयोः" इति अण्प्रत्ययः, तयोः धरः तथोक्तः। प्रगल्भवाक् प्रौढवचनः। ब्रह्ममयेन वैदिकेन। तेजसा ब्रह्मवर्चसेन इत्यर्थः। ज्वलन्निव स्थितः, इवशब्दो निर्धारणार्थः। कश्चित् अनिर्दिष्टः जटिलः जटावान् ब्रह्मचारीति शेषः, पिच्छादित्वादिलच् प्रत्ययः। शरीरबद्धः बद्धशरीर शरीरवान् इत्यर्थः। वाहिताग्न्यादिषु पाठात् साधुः। प्रथमाश्रमः यथा ब्रह्मचर्याश्रम इव; यथाशब्द इवार्थे। तपोवनं देव्या इति शेषः। विवेश प्रविष्टवान्॥३०॥

टि०—अथ इससे नये विषय का आरम्भ सूचित किया जाता है। इसके विविध अर्थों के लिए देखो,

अथाथो संशये स्यातामधिकारे च मङ्गले।
विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भसमुच्चये ॥ मेदिनी

अथ शब्द ब्रह्मा के कण्ठ में से निकला कहा गया है, इसलिए यह माङ्गलिक समझा जाता है।

ओङ्कारश्चाथशब्दश्च द्वावेव ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्यातो तेन माङ्गलिकावुभौ ॥

अजिनाषाढ-धरः—अजिनं च आषाढश्च इति अजिनाषाढौ (द्वन्द्व०), तयोः धरः (तत्पु०); अजिन—काले मृग की त्वचा। ब्राह्मण को ब्रह्मचर्य आश्रम में काली मृगछाला धारण और पलाशदण्ड ग्रहण करने का आदेश दिया गया है। देखो,

'हारिणमैणेयं वा कार्ष्णं ब्राह्मणस्य' आपस्तम्ब

और 'ब्राह्मणो बैल्वपालाशौ' मनु

जिस व्यक्ति का वर्णन किया गया है वह शिव के अतिरिक्त और कोई नहीं था तथा वह पार्वती की प्रेम-परीक्षा के लिए ब्रह्मचारी का रूप धारण करके आया था। **प्रगल्भ-वाक्**—प्रगल्भा वाक् यस्याः सः (बहु०), 'गम्भीर वाणीवाला, वाक्पटु'। **ब्रह्ममयेन**—ब्रह्ममय (ब्रह्म +मयट्) का तृतीया। इसका सम्बन्ध 'तेजसा' से है। **जटिलः**—जटाः सन्त्यस्येति; जटा + इलच्। **शरीर-बद्धः**—शरीरेण बद्धः, 'शरीर से युक्त', अर्थात् 'मूर्त्तिमान' अथवा समास का विग्रह ऐसे भी हो सकता है:—शरीरं बद्धं यस्य (बहु०) सः। यहाँ बद्ध शब्द बहुव्रीहि समास का विकल्प से दूसरा पद होगा (वाहिताग्न्यादिषु पा० २. २. ३७); इस प्रकार 'बद्धशरीरः' भी रूप होगा। इस पद्य में साकार की भाववाचक के साथ सदृशता दिखाई गई है। ब्रह्मचारी (साकार) की प्रथमाश्रम (भाववाचक) के साथ तुलना की गई है। प्रायः कालिदास ने भाववाचक पदार्थ की साकार के साथ तुलना की है, किन्तु जब वह किसी साकार की भाववाचक के साथ तुलना करता है तब वह भाववाचक को ही साकार

प्रकट करता है। यहाँ भाववाचक 'प्रथमाश्रम' को पहले आकार प्रदान किया गया है और बाद में ब्रह्मचारी से तुलना की गई है (शरीरबद्धः प्रथमाश्रमो यथा।) कुछ लोग 'यथा' को 'इव' के अर्थ में लेते हैं, 'इव' से कल्पना सूचित होती है न कि उपमा। परंतु 'यथा' श्रौती का सूचक है और केवल तुलनात्मक 'इव' के लिए प्रयुक्त हो सकता है न कि सम्भावना-सूचक 'इव' के स्थान पर। देखो, श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि।

हिन्दी—इसके अनन्तर काली मृगछाला धारण और पलाश-दण्ड ग्रहण किए कोई वाक्पटु, ब्रह्म-तेज से दीप्तिमान, जटाधारी (ब्रह्मचारी), ब्रह्मचर्य का माना रूप धारण किए तपोवन में आया। [३०]

> तमातिथेयी बहुमान-पूर्वया
> सपर्यया प्रत्युदियाय पार्वती।
> भवन्ति साम्येऽपि निविष्ट-चेतसां
> वपुर्विशेषेष्वतिगौरवाः क्रियाः॥ [३१]

अन्वयः—आतिथेयी पार्वती बहुमानपूर्वया सपर्यया तं प्रत्युदियाय। साम्ये (सति) अपि निविष्टचेतसां वपुर्विशेषेषु अतिगौरवाः क्रियाः भवन्ति।

वाच्यपरि०—आतिथेय्या पार्वत्या....सः प्रत्युदीये।....अतिगौरवाभिः क्रियाभिः भूयते।

श०—आतिथेयी—अतिथियों का सत्कार करनेवाली। बहुमान—अधिक सत्कार। प्रत्युदियाय—स्वागत के लिए आगे बढ़ी। सपर्या—पूजा। साम्य—तुल्य। निविष्ट—स्थिर चित्त। वपुस्—शरीर। विशेष—खास। गौरव—प्रतिष्ठा। क्रिया—चेष्टा।

मल्लि०—तमिति। अतिथिषु साध्वी आतिथेयी। पथ्यतिथ्यादिना ढञ् प्रत्ययः, टिड्ढाणञित्यादिना ङीप्। पार्वती तं ब्रह्मचारिणम् बहुमान-पूर्वया बहुमानः पूर्वो यस्यास्तया गौरवपूर्वया इत्यर्थः। सपर्यया अर्चया; "सपर्यार्चार्हणाः समः" इत्यमरः। प्रत्युदियाय प्रत्युज्जगाम। कथं समाने-ऽपि तस्याः तादृशी प्रतिपत्तिः, अत आह—साम्ये सति अपि निविष्ट-चेतसां स्थिरचित्तानाम्। वपुर्विशेषेषु शरीरविशेषेषु। अतिशयित

गौरवं यासु ताः **अतिगौरवाः** अतिगौरवसहिताः । **क्रियाः** चेष्टाः भवन्ति प्रवर्तन्त इत्यर्थः । साधवो न साम्याभिनिवेशिन इति भावः ॥ ३१ ॥

टि०—**आतिथेयी**—अतिथिषु साध्वी; अतिथि + ढञ् (=एय) (पथ्यतिथिवसतिस्वपतेर्ढञ् पा० ४. ४. १०४) आतिथेयम् + ङीप् (स्त्री० प्रत्यय) । ऐसे ही और रूप हैं:—पाथेयम्, वासतेयी (रात्रिः), स्वापतेयम् (धनम्), आदि । **बहुमान-पूर्वया**—बहुमानः पूर्वः यस्याः तया (बहु०), 'जिससे पहले अधिक आदर-भाव किया गया था' । **सपर्या**—सपर (कण्ड्वादि वर्ग का शब्द) 'पूजार्थे' + यक् (कण्ड्वादिभ्यो यक् पा० ३. १. २७); सपर्य +अ (अ प्रत्ययात् पा० ३. ३. १०२) +टाप् (स्त्री० प्रत्यय) । **प्रत्युदियाय**—स्वागत के लिए उठी; प्रति+उत+इ 'जाना'। इस भाव के लिए देखो,

तमर्घ्यमर्घ्यादिकयादिपूरुषः सपर्यया साधु स पर्यपूपुजत् । माघ० १. १५.
वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत् सेति ननन्दतुस्तौ । रघु०२.२२.
सोऽहं सपर्याविधिभाजनेन मत्वा भवन्तं प्रभुशब्दशेषम् । रघु० ५. २२.

प्राचीन समय में अतिथि-सेवा पर बहुत जोर दिया जाता था । इसे उन पाँच यज्ञों में से एक यज्ञ समझा जाता था, जिन्हें प्रत्येक गृहस्थ के लिए करना आवश्यक होता था । देखो,

पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ॥ अमर

और भी देखो,

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥ मनु ३. ७०.

निविष्ट-चेतसाम्—निविष्टं चेतः येषां ते निविष्टचेतसः (बहु०), तेषाम्, 'उनका जिनका मन एकाग्र हो रहा था' । **साम्ये**—समस्य भावः साम्यम्, (सम+ष्यञ्), 'तुल्यता' । **वपुर्विशेषेषु**—वपुष्षु विशेषाः इति वपुर्विशेषाः तेषु, 'खास-खास व्यक्तियों के विषय में' । **अतिगौरवाः**—अतिशयितं गौरवं यासु ताः (बहु०) । वे व्यक्ति भी जो सम-बुद्धि हैं, सम्भ्रान्त जनों के प्रति आदर-भाव का व्यवहार करते हैं । यही भाव देखो,

आकृतिविशेषेष्वादरः पदं करोति। मालविका० १.

हिन्दी— अतिथियों का अधिक सत्कार करनेवाली पार्वती पहले बहुत आदर करके उस (ब्रह्मचारी) के पूजन के लिए आगे बढ़ी। समानता रहने पर भी स्थिर-चित्तवालों की क्रियायें विशेष व्यक्तियों के प्रति बड़ी गौरववाली होती हैं। [३१]

विधि-प्रयुक्तां परिगृह्य सत्क्रियां
परिश्रमं नाम विनीय च क्षणम्।
उमां स पश्यन्नृजुनैव चक्षुषा
प्रचक्रमे वक्तुमनुज्झित-क्रमः॥ ३२॥

अन्वयः—सः विधि-प्रयुक्तां सत्क्रियां परिगृह्य क्षणं परिश्रमं विनीय च नाम उमाम् ऋजुनैव चक्षुषा पश्यन् अनुज्झित-क्रमः (सन्) वक्तुं प्रचक्रमे।

वाच्यपरि०—तेन....पश्यता अनुज्झितक्रमेण (सता) वक्तुं प्रचक्रमे।

श०—सत्क्रिया—अतिथि-सत्कार, पूजा। परिगृह्य—स्वीकार करके। क्षणम्—क्षण भर। परिश्रम—थकान। विनीय—दूर करके। ऋजु—सरल। चक्षुष्—दृष्टि। अनुज्झित-क्रम—शिष्टाचार को उल्लंघन किये बिना। प्रचक्रमे—आरम्भ कर दिया।

मल्लि०—विधीति। सः ब्रह्मचारी। विधि-प्रयुक्ताम् विधिना प्रयुक्ताम् अनुष्ठिताम्। सत्क्रियां पूजाम्। परिगृह्य स्वीकृत्य। क्षणं परिश्रमं विश्रामं च विनीय नाम नामेति अपरमार्थे। अथ उमाम् ऋजुनैव विलास-रहितेनैव। चक्षुषा पश्यन् अनुज्झित-क्रमः अत्यक्तोचितपरपाटीकः सन् वक्तुं प्रचक्रमे प्रारेभे॥ ३२॥

टि०—विधि-प्रयुक्ताम्—विधिना प्रयुक्ता विधिप्रयुक्ता ताम्, 'शास्त्र की विधि के अनुसार की गई को'। सत्क्रियाम्—सत् क्रिया सत्क्रिया (तत्पु०) (कुगतिप्रादयः पा० २. २. १८), ताम्। सत् उपसर्ग के क्रिया के साथ जुड़ने पर अर्थ होगा 'आदर' (आदरानादरयोः सदसती पा० १. ४. ६३)। परिगृह्य—परि+√ग्रह्+क्त्वा (=ल्यप्), स्वीकार करके। विनीय—वि√नी+क्त्वा (=ल्यप्), दूर करके। शिव को, जो ब्रह्मचारी के वेश में थे, थके हुए यात्री का अभिनय करना था। नाम—इस अव्यय का यहाँ प्रयोग इस बात के दिखाने के लिए हुआ है जो सत्य नहीं

क्योंकि शिव वास्तव में थके नहीं थे। ऋजुना—'सरल' तृ० एक व०। भावगर्भितता के विरोध में सरलता का बोध होता है। यद्यपि यह अवसर ऐसा था कि शिव ने पार्वती को अच्छी प्रकार जाँच की दृष्टि से देखा होता परन्तु शिव ने उदासीनता दिखाई और पार्वती को ऐसे देखा जैसे कोई साधारण व्यक्ति देखता हो। अनुज्झितक्रमः—न उज्झितः क्रमः येन (बहु०) सः, वह जिसने शिष्टाचार का उल्लंघन नहीं किया। इससे प्रकट होता है कि शिव का अपने भावों पर पूरा नियन्त्रण था। प्रचक्रमे—प्र+ √क्रम् 'आरम्भ करना' + लङ्। प्र और उप सहित √क्रम् आत्मनेपदी है। (प्रापाभ्यां समर्थाभ्याम् पा० १. ३. ४२), अन्यथा √क्रम् उभयपदी है।

हिन्दी—उस (ब्रह्मचारी) ने विधिपूर्वक सत्कार स्वीकार कर, क्षण भर में थकान को दूर किया। उन्होंने उमा (पार्वती) को सरल दृष्टि से देखते हुए, उचित शिष्टाचार का त्याग किये बिना, बोलना आरम्भ कर दिया। [३२]

अपि क्रियार्थं सुलभं समित्कुशं
जलान्यपि स्नान-विधि-क्षमाणि ते।
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्म-साधनम् ॥ ३३ ॥

अन्वयः—क्रियार्थं समित्कुशं सुलभम् अपि? जलानि ते स्नान-विधि-क्षमाणि अपि? स्वशक्त्या तपसि प्रवर्तसे अपि? खलु शरीरम् आद्यं धर्म-साधनम्।

वाच्यपरि०—क्रियार्थेन समित्कुशेन सुलभेन (भूयते), जलैः ....स्नानविधिक्षमैः... (भूयते),....। ... शरीरेण आद्येन धर्मसाधनेन (भूयते)।

श०—समित्—होम के लिए लकड़ी। विधि—क्रिया। क्षम—योग्य। धर्म-साधन—धर्म सिद्ध करने का उपाय।

मल्लि०—अपीति। अत्र अपिशब्दः प्रश्ने। क्रियार्थं होमादि-कर्मानुष्ठानार्थम्। समिधश्च कुशाश्च समित्कुशम्, "जातिरप्राणिनाम्" इति

द्वन्द्वैकवद्भावः । सुलभम् अपि ? सुलभं कच्चित् ? जलानि ते तव स्नान-विधिक्षमाणि स्नानक्रियायोग्यानि । अपि कच्चित् ? किञ्च स्वशक्त्या निजसामर्थ्यानुसारेण । तपसि प्रवर्तसे अपि ? देहम् अपीडयित्वा तपश्चरसि कच्चित् ? इत्यर्थः । युक्तञ्च नाम एतत्, खलु यस्मात् शरीरम् आद्यं धर्मसाधनम् । धर्मस्तु कायेन मनसा वाचा बुद्ध्या धनादिनां च बहुभिः साध्यते, तेषु च वपुः एव मुख्यं साधनम्, सति देहे धर्मार्थ-काममोक्षलक्षणाश्चतुर्वर्गाः साध्यन्ते । अत एव "सततमात्मानमेव गोपायीत" इति श्रुतिः ॥ ३३ ॥

टि०—अपि—अव्यय; वाक्य के आरम्भ में यह अव्यय प्रश्न के अर्थ में प्रयुक्त होता है । इसके भिन्न-भिन्न अर्थों के लिए देखो,

'गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि' अमर
'अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये ।
तथा युक्तपदार्थे च कामचारक्रियासु च ॥' विश्व

क्रियार्थम्—क्रियायै इदम्; समास के वास्तविक शब्द क्रिया और अर्थ के साथ इस समास का विग्रह नहीं किया जा सकता क्योंकि नित्यसमास का विग्रह हो ही नहीं सकता । (अविग्रहो नित्यसमासः अस्वपदविग्रहो वा) । यह 'समित्कुशम्' का विशेषण है और इसी के अनुसार इसका लिङ्ग तथा वचन है । समित्कुशम्—समिधश्च कुशाश्चेति समित्कुशम् (द्वन्द्व) । द्वन्द्व समास एक वचन में होता है, जब समास के शब्द वस्तुओं (न कि गुणों) और पशुओं को सूचित करते हैं तथा जब जाति को विशेष रूप से संकेत किया जाता है । (जातिरप्राणिनाम् पा० २.४.६) । जातिसूचक नामों के द्वन्द्व समास, जो कि निर्जीव वस्तुओं के हैं, एक वचन में ही होते हैं । (देखो, भट्टोजिः—जातिप्राधान्य एवायमेकवद्भावः द्रव्यविशेषविवक्षायां तु बदरामलकानि, अर्थात् यह तब होता है जब जाति से कोई रुकावट नहीं होती । उदाहरणतया बदरामलकानि ।) सुलभम्—सु+√लभ्+खल् (ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् पा० ३. ३. १२६) । स्नान-विधि-क्षमाणि—स्नानस्य विधये क्षमाणि (तत्पु०), 'स्नान के योग्य' । शरीरम्—शीर्यते इति शरीरम् (शॄ+ईर उ०

प्रत्यय) अर्थात् वह जो शीर्ण हो जाता है। अतः सावधान होकर इसकी रक्षा करनी चाहिए। बिना सोच-विचार किये कोई काम नहीं करना चाहिए। अन्यथा पश्चात्ताप करना पड़ता है। देखो, भर्तृहरि नीति० ९९ अविरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयग्राही शल्यतुल्यो विपाकः।

धर्म-साधनम्—धर्मस्य साधनम् (तत्पु०)। यह शरीर धर्म-कर्म के अनुष्ठान के लिए परम साधन है। अतः इसकी बड़ी सावधानी से देख-भाल करनी चाहिए। कालिदास ने शरीर की रक्षा पर खास ज़ोर दिया है, क्योंकि इसी के द्वारा आध्यात्मिक तथा आर्थिक उन्नति निर्भर है।

हिन्दी—होम आदि के लिए क्या समिध और कुशा सहज से प्राप्त हो जाती है? स्नान के लिए क्या योग्य जल मिल जाता है? क्या अपनी शक्ति के अनुसार तपस्या में प्रवृत्त होती हो? निश्चय से शरीर धर्म के साधन में मुख्य (साधन) है। [३३]

अपि त्वदावर्जित - वारि - सम्भृतं
प्रवालमासामनुबन्धि वीरुधाम्।
चिरोज्झितालक्तक - पाटलेन ते
तुलां यदारोहति दन्त-वाससा ॥ ३४ ॥

अन्वयः—त्वदावर्जितवारिसम्भृतम् आसां वीरुधां प्रवालम् अनुबन्धि अपि? यत् चिरोज्झितालक्तक-पाटलेन ते दन्तवाससा तुलाम् आरोहति।

वाच्यपरि०—त्वदावर्जितवारिसम्भृतेन....प्रवालेन अनुबन्धिना.... (भूयते), येन....तुला आरुह्यते।

श०—आवर्जित—सिक्त। वारि—जल। सम्भृत—उत्पन्न। वीरुध्—लता। प्रवाल—कोंपल। अनुबन्धिन्—निरन्तर। उज्झित—त्यक्त। अलक्तक—लाक्षारस। पाटल—लाल। दन्तवासस्—होंठ।

मल्लि०—अपीति। (त्वदावर्जित-वारिसम्भृतम्) त्वया आवर्जितेन सिक्तेन वारिणा सम्भृतं जनितम् आसां वीरुधां लतानाम्। प्रवालं पल्लवम् अनुबन्धि अपि अनुस्यूतं किम्? यम् प्रवालं चिरोज्झितः चिरकालत्यक्तः अलक्तकः लाक्षारागो येन तत् यथाऽपि पाटलं स्वभावरक्तमित्यर्थः तेन चिरोज्झितालक्तक-पाटलेन। ते तव। दन्तवाससा अधरेण, "ओष्ठाधरौ

तु रदनच्छदौ दशनवाससी" इत्यमरः । तुलां साम्यम् । आरोहति गच्छति इत्यर्थः । अत्र तुलाशब्दस्य सादृश्यवाचित्वात् तद्योगेऽपि "तुल्यार्थैरतुलोपमाभ्याम्" इति न तृतीयाप्रतिषेधः, तत्र सूत्रे सदृशवाचिन एव ग्रहणादिति ॥ ३४ ॥

टि०—त्वदावर्जित-वारि-सम्भृतम्—त्वया आवर्जितेन वारिणा सम्भृतम् (तत्पु०); आवर्जित–आ+√वृज्+क्त ; √वृज् ७ पर० का अर्थ है 'हटाना' परन्तु आ उपसर्ग के साथ इसका अर्थ है 'छिड़कना' । सम्भृत–सम्+√भृ १,३ उभय० 'पालना'+क्त । वीरुधाम्–वि+√ रुध्+क्विप् (क्विप् पा० ३. २. १७८) ; वि की इ को दीर्घ हो जाता है (अन्येषामपि दृश्यते पा० ६. ३. १३७)। अनुबन्धि—(नपुं०) अनु+√बन्ध् ९ पर० + णिनि, 'निरन्तर' । चिरोज्झितालक्तक-पाटलेन—चिराद् उज्झितः अलक्तकः येन (बहु०) तत् च पाटलं च (कर्म०) तेन । यह 'दन्तवाससा' का विशेषण है। पार्वती के होंठ जन्म से ही लाल थे, क्योंकि चिरकाल से लाक्षारस आदि के न लगाये जाने पर भी वह लाल रहते थे। दन्तवाससा तुलाम् आरोहति—दन्तवाससा का तृ० एक व०। तृतीया का प्रयोग सूत्र के विरुद्ध है (तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् पा० २. ३. ७५)। तुला और उपमा के साथ षष्ठी लगती है किन्तु मल्लिनाथ के मतानुसार तृतीया का प्रयोग ठीक है; क्योंकि 'तुला' शब्द संज्ञा के रूप में यहाँ प्रयुक्त हुआ है (सादृश्यवाची) न कि विशेषण के रूप में (सदृशवाची)। परन्तु यदि हम 'दन्तवाससा' के साथ 'सह' लगा दें तो तृतीया के साथ 'सह' न्याययुक्त होने के कारण कोई बाधा नहीं की जा सकती।

हिन्दी—तुम्हारे जल-सिंचन से उत्पन्न हुई क्या इन लताओं के नये पत्ते निकल आये हैं, जो चिरकाल से अलक्तक रहित और स्वभाव से रक्त तुम्हारे अधरोष्ठ की समता करते हैं ? [३४]

अपि प्रसन्नं हरिणेषु ते मनः
करस्थ - दर्भ - प्रणयापहारिषु ।
य उत्पलाक्षि ! प्रचलैर्विलोचनै-
स्तवाक्षि - सादृश्यमिव प्रयुञ्जते ॥ ३५ ॥

अन्वयः—अपि करस्थदर्भप्रणयापहारिषु हरिणेषु ते मनः प्रसन्नम् ? (हे) उत्पलाक्षि ! ये प्रचलैः विलोचनैः तव अक्षि-सादृश्यं प्रयुञ्जते इव ।

वाच्यपरि०:—....मनसा प्रसन्नेन (भूयते)....यैः....प्रयुज्यते.... ।

श०—दर्भ—कुश । प्रणय—प्रेम । उत्पलाक्षि—कमल-नयनि ! प्रचल—चंचल । विलोचन—नेत्र । सादृश्य—सदृशता ।

मल्लि०—अपीति । (करस्थ-दर्भ-प्रणयापहारिषु) करस्थान् दर्भान् प्रणयेन स्नेहेन अपहरन्ति इति ते तथोक्तेषु सापराधेषु इति भावः 'करस्थदर्भप्रणयापराधिषु, इति पाठे दर्भाणां प्रणयेन प्रार्थनया अपराधिषु । हरिणेषु विषये ते मनः प्रसन्नम् अपि ? न क्षुभितं किम् ? सापराधेषु अपि न कोपितव्यं तपस्विभिरिति भावः । हे उत्पलाक्षि ! ये हरिणाः । प्रचलैः चञ्चलैः । विलोचनैः नेत्रैः । तव अक्षि-सादृश्यं प्रयुञ्जते इव अभिनयन्तीव । प्रसन्नत्वात् मृगनेत्राणि त्वन्नयनैः साम्यमुपयान्तीति भावः । 'उत्पलाक्षेपचलैः' इति पाठान्तरे उत्पलकम्पचलैः, "भावानयने द्रव्यानयनम्" इति न्यायेन क्षिप्यमाणोत्पलचलैरित्यर्थः ॥ ३५ ॥

टि०—करस्थ-दर्भ-प्रणयापहारिषु—करे तिष्ठतीति करस्थः, कर + √स्था (आतोऽनुपसर्गे कः पा० ३. २. ३); करस्थान् दर्भान् प्रणयेन अपहर्त्तुं शीलं येषां (बहु०), ते करस्थदर्भप्रणयापहरिणः, 'जो हाथ में पकड़े कुश को सप्रेम छीन ले जाते हैं' । इससे उनकी घनिष्ठता प्रकट होती है । उत्पलाक्षि—उत्पले इव अक्षिणी यस्याः (बहु०) तत्सम्बुद्धौ, हे कमल-नयनि ! प्रचलैः—प्रकर्षेण चलैः, 'अत्यन्त चंचल' । कुछ लोग "उत्पलाक्षि प्रचलैः" के बदले "उत्पलाक्षेपचलैः" पाठ पढ़ते हैं । तब इस समास का अर्थ होगा 'जो कि हिल रहे कमलों की नाईं चंचल हैं' । अक्षिसादृश्यम्—अक्ष्णोः सादृश्यम् (तत्पु०); सदृशस्य भावः, सदृश + ष्यञ्,' सदृशता' । प्रयुञ्जते—लिट् प्रथम पु०; √ युज् ७ उभय० 'जोड़ना' का उपसर्ग के साथ अर्थ बदल जाता है । प्र + √युज् का अर्थ होगा 'अभिनय करना' । प्र और उप के साथ युज् आत्मनेपदी धातु है । (प्रोपाभ्यां युजेरयज्ञपात्रेषु पा० १. ८. ६४) । इस पद्य का भाव इसी सर्ग के १५वें पद्य में पहले वर्णन किया गया है । देखो, "अरण्यबीजाञ्जलिदानलालितास्तथा...।"

हिन्दी—क्या तुम्हारा मन इन हरिणों में प्रसन्न है, जो हे कमलाक्षि ! तुम्हारे हाथ में पकड़ी हुई कुशा को स्नेह के कारण छीन ले जाते हैं और चंचल नेत्रों से तुम्हारे नेत्रों की सदृशता का अभिनय करते हैं ? [३५]

यदुच्यते पार्वति ! पाप-वृत्तये
न रूपमित्यव्यभिचारि तद्वच
तथा हि ते शीलमुदार - दर्शने !
*तपस्विनामप्युपदेशतां गतम् ॥ ३६ ॥**

अन्वयः—(हे) पार्वति ! रूपं पाप-वृत्तये न इति यत् उच्यते तत् वचः अव्यभिचारि। तथा हि (हे) उदार-दर्शने ! ते शीलं तपस्विनाम् अपि उपदेशतां गतम् ।

वाच्यपरि०—''''रूपेण''''(भूयते),'''ब्रुवन्ति (लोकाः),''''तेन वचसा अव्यभिचारिणा (भूयते),''''शीलेन''''उपदेशता गता ।

श०—वृत्ति—आचरण । अव्यभिचारिन्—सब प्रकार से सत्य । उदार-दर्शना—रूपवती । शील—स्वभाव । उपदेशता—उपदेश-रूपत्व ।

मल्लि०—यदिति । हे पार्वति ! रूपं सौम्याकृतिः । पाप-वृत्तये पापाचरणाय न भवति इति यदुच्यते लोकैरिति शेषः, तद्वचः न व्यभिचरति न स्खलतीति अव्यभिचारि सत्यम्, "यत्राऽऽकृतिस्तत्र गुणा वसन्ति", "न सुरूपाः पापसमाचारा भवन्ति" इत्यादयो लोकवादा न विसंवादमासादयन्ति इत्यर्थः । किमिति ज्ञायते ? तथा हि—हे उदार-दर्शने ! आयताक्षि ! सुरूपे ! इत्यर्थः । अथवा उन्नतज्ञाने ! विवेकवतीत्यर्थः । ते तव । शीलं सद्वृत्तम्, "शीलं स्वभावे सद्वृत्ते" इत्यमरः । तपस्विनाम् अपि उपदिश्यते अनेनेति उपदेशः प्रवर्त्तकं प्रमाणम्, तत्ताम् उपदेशतां गतं प्राप्तम्। मुनयोऽपि त्वां वीक्ष्य स्ववृत्ते प्रवर्तन्ते इति भावः ॥ ३६ ॥

टि०—पापवृत्तये—पापस्य वृत्तये, 'पापाचरण के लिए'। अव्यभिचारि—न व्यभिचरतीति तत्, जो कभी मिथ्या प्रमाणित न हो। ब्रह्मचारी के कहने का तात्पर्य यह है कि सुन्दर व्यक्ति सदा सुन्दर कार्य करते हैं। देखो, 'यत्राकृतिस्तत्र गुणा वसन्ति।' सुभाषित० और

'न ह्याकृतिः सुसदृशं विजहाति वृत्तम् ।' मृच्छ० । उदारदर्शने—उदारं दर्शनं यस्याः सा उदारदर्शना, तत्सम्बोधने, हे सुन्दर दर्शन वाली ! मल्लिनाथ के अनुसार दर्शन शब्द का अर्थ 'नेत्र' है और उदार शब्द का 'लम्बा' है, सारे समास का इस प्रकार अर्थ होगा 'दीर्घाक्षि !'। उपदेशता—उपदेशस्य भावः, उप+दिश् + घञ् + ता, शिक्षा अथवा ज्ञान प्रदान करने की दशा । एम. आर. काले ने यहाँ निम्न पद्य उद्धृत किया है:—

न तुलाविषये तवाकृतिर्न वचो वर्त्मनि ते सुशीलता ।
त्वदुदाहरणाकृतौ गुणा इति सामुद्रिकसारमुद्रणा ॥ नैषध०

हिन्दी—हे पार्वती ! जो कहा जाता है कि सुन्दरता पापाचरण नहीं करती सो यह वचन असत्य नहीं । क्योंकि हे सुन्दरि ! (विशालाक्षि !) तुम्हारा सद्वृत्त तपस्वियों के लिए भी उपदेश का स्थान वन गया है । [३६]

विकीर्ण-सप्तर्षि-बलि-प्रहासिभि-
स्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ।
यथा त्वदीयैश्चरितैरनाविलै-
र्महीधरः पावित एष सान्वयः ॥ ३७ ॥

अन्वयः—एष महीधरः विकीर्ण-सप्तर्षि-बलि-प्रहासिभिः दिवः च्युतैः गाङ्गैः सलिलैः तथा न (पावितः), अनाविलैः त्वदीयैः चरितैः तथा सान्वयः पावितः ।

वाच्यपरि०—एतं महीधरं बलिप्रहासीनि....च्युतानि गाङ्गानि सलिलानि....न (पावितवन्ति)....अनाविलानि त्वदीयानि चरितानि सान्वयः....पावितवन्ति ।

श०—विकीर्ण—विखेरे गये । बलि—भेंट । च्युत—पतित । गाङ्ग—गंगा सम्बन्धी । सलिल—जल । अनाविल—निर्मल । महीधर—पर्वत । अन्वय—कुल । पावित—पवित्र किया गया ।

मल्लि०—विकीर्णेति । एष महीधरः हिमवान् (विकीर्ण-सप्तर्षि-बलि-प्रहासिभिः) सप्त च ते ऋषयश्च सप्तर्षयः, 'दिक्संख्ये संज्ञायाम्" इति समासः, विकीर्णैः पर्यस्तैः सप्तर्षीणां सम्बन्धिभिः बलिभिः पुष्पो-

पुष्पहारैः प्रहसन्ति ये तथोक्तैः। दिवः अन्तरिक्षात्। च्युतैः गाङ्गैः सलिलैः तथा न पावितः। अनाविलैः अकलुषैः। त्वदीयैः चरितैः यथा सान्वयः सपुत्रपौत्रः पावितः पवित्रीकृतः॥ ३७॥

टि०—विकीर्ण-सप्तर्षि-बलि-प्रहासिभिः—विकीर्णैःसप्तर्षीणां बलिभिः प्रहसन्तीति तानि विकीर्णसप्तर्षिबलिप्रहासीनि तैः, विकीर्ण—वि+√कॄ 'बिखेड़ना,' + क्त; बलि का विशेषण है। सप्तर्षि—सप्त च ते ऋषयश्चेति सप्तर्षयः (कर्म०) (दिक्संख्ये संज्ञायाम् पा० २. १. ५१)। मरीचि, अङ्गिरस्, अत्रि, पुलस्त्य, पुलह, क्रतु और वसिष्ठ नाम के ये सात तारे हैं जो सप्तर्षि कहलाते हैं। बलि—इसका सम्बन्ध सप्तर्षियों द्वारा पुष्पोपहार से है। प्रहासिभिः—गंगा नदी का जल-पुंज उपहार-पुष्पों से मानो मुस्करा रहा है। मुस्कराहट और यश का वर्णन सफेद वस्तुओं से किया जाता है ('धवलता वर्ण्यते हासकीर्त्योः' सा० दर्पण) और यहाँ सफेद पुष्प गंगा नदी की सफेद मुस्कराहट माने गये हैं। दिवश्च्युतैः—आकाश से गिराये गये। सप्तर्षियों द्वारा आकाश से गिराये गये उपहार-पुष्पों से गंगा नदी के जल-पुंज की पवित्रता सूचित की गई है। अनाविलैः—न आविला अनाविलाः ताः, अकलुष। गंगा का जल-पुंज पार्वती के सत्कर्मों से अधिक पवित्र नहीं है। महीधरः—मह्याः धरः (षष्ठी-तत्पु०), धरतीति धरः, √धृ १ उ०+क (इगुपधज्ञाप्रीकिरः कः पा० ३. १. १३५); इससे पार्वती के पिता पर्वतराज हिमालय की ओर संकेत किया गया है। सान्वयः—अन्वयेन सह वर्त्तत इति (बहु०), वंशजों सहित।

हिन्दी—सप्तर्षियों द्वारा समर्पण करते समय बिखरे हुए उपहार-पुष्पों से शोभित, (और) स्वर्ग से पतित गंगा-जल द्वारा हिमालय वैसा पवित्र न हुआ जैसा तुम्हारे (इन) निष्पाप चरितों के कारण यह वंश सहित पवित्र हुआ है। [३७]

अनेन धर्मः सविशेषमद्य मे
त्रिवर्ग-सारः प्रतिभाति भाविनि !
त्वया मनोनिर्विषयार्थ - कामया
यदेक एव प्रतिगृह्य सेव्यते॥ ३८॥

अन्वयः—(हे) भाविनि ! अनेन धर्मः सविशेषं त्रि-वर्ग-सारः अद्य मे प्रतिभाति, यत् मनोनिर्विषयार्थ-कामया त्वया एकः एव प्रतिगृह्य सेव्यते ।

वाच्यपरि०—....धर्मेण ....त्रिवर्गसारेण प्रतिभायते, ...मनोनिर्विषयार्थकामा त्वम् एकमेव (धर्मं)....सेवसे ।

श०—भाविनि—हे प्रशस्त भावोंवाली । सविशेषम्—विशेष रूप से । सार—तत्त्व । वर्ग—धर्म, अर्थ, काम । प्रतिभाति—प्रतीत होता है । निर्विषय—विषय रहित । प्रतिगृह्य—स्वीकार करके । सेव्यते—सेवन (आचरण) किया जाता है ।

मल्लि०—अनेनेति । हे भाविनि ! प्रशस्ताभिप्राये ! अनेन कारणेन । धर्मः सविशेषं सातिशयम् । अद्य मे (त्रि-वर्ग-सारः) त्रयाणां धर्मकामार्थानां वर्गः त्रिवर्गः "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः" इत्यमरः ; तत्र सारः श्रेष्ठः प्रतिभाति । यत् यस्मात् कारणात् । (मनोनिर्विषयार्थकामया) मनसो निर्विषयौ अर्थकामौ यस्याः तया । त्वया एकः धर्म एव प्रतिगृह्य स्वीकृत्य सेव्यते । यत् त्वया अर्थकामौ विहाय धर्म एव अवलम्बितः, अतः सर्वेषां नः स श्रेयान् इति प्रतिपद्यत इत्यर्थः ॥ ३८ ॥

टि०—भाविनि—प्रशस्तः भावः अस्याः अस्तीति तत्सम्बुद्धौ, √भू + णिनि + ङीप् + सम्बोधन । त्रिवर्गसारः—त्रयाणां वर्गाणां समाहारः त्रिवर्गम् (द्विगु०) तस्मिन् सारः (तत्पु०); धर्म, अर्थ, काम के वर्ग में से श्रेष्ठ । पार्वती द्वारा केवल धर्म का ही आश्रय ग्रहण करने से सिद्ध होता है कि धर्म ही त्रिवर्ग में से श्रेष्ठ है । कालिदास ने धर्म, अर्थ और काम के त्रिवर्ग का उल्लेख किया है परंतु धर्म, अर्थ, काम तथा मोक्ष के चतुर्वर्ग का नहीं, क्योंकि कालिदास के विचार में मोक्ष जीवन का परम श्रेष्ठ विषय है । इससे प्रकट होता है कि कालिदास वास्तविक जगत् में विचरता है, और उसके विचार सम्भावना के क्षेत्र से बाहर नहीं जाते । मनोनिर्विषयार्थ-कामया—मनसोः निर्विषयौ अर्थकामौ यस्याः सा (बहु०), 'जिसका मन अर्थ तथा काम का विषय नहीं है ; तथा निर्विषयौ—निर्गतः विषयः यस्येति सः निर्विषयः, तौ । अर्थकामौ—

अर्थश्च कामश्चेति तौ (द्वन्द्व०)। प्रतिगृह्य—प्रति+ग्रह् + ल्यप्। प्रति + √ग्रह् का अर्थ होता है 'स्वीकार करना'।

हिन्दी—हे धर्मप्रिये! क्योंकि तुम, अपने मन से अर्थ और काम के विषयों को निकालकर, एकमात्र धर्म को ही स्वीकार कर इसका आचरण कर रही हो, इसी लिए आज मुझे धर्म ही विशेष रूप से त्रिवर्ग (धर्म, अर्थ, और काम) में श्रेष्ठ प्रतीत हो रहा है। [३८]

प्रयुक्त - सत्कार - विशेषमात्मना
न मां परं सम्प्रतिपत्तुमर्हसि।
यतः सतां सन्नत - गात्रि ! सङ्गतं
मनीषिभिः साप्तपदीनमुच्यते ॥ ३९ ॥

अन्वयः—(हे) सन्नत-गात्रि ! आत्मना प्रयुक्त-सत्कार-विशेषं मां परं सम्प्रतिपत्तुं न अर्हसि, यतः मनीषिभिः सतां सङ्गतं साप्तपदीनम् उच्यते।

वाच्यपरि०—....नार्ह्यते।....मनीषिणो....ब्रुवन्ति।

श०—सत्कारविशेष—विशेष आदर-भाव। सम्प्रतिपत्तुम्—समझने के लिए। सन्नत—झुका हुआ। गात्र—अङ्ग,शरीर। सङ्गत—भेंट, मित्रता। मनीषिन्—विद्वान्। साप्तपदीन—सात पदों द्वारा प्राप्त (सख्य)।

मल्लि०—सम्प्रति मनोरथं जिज्ञासुः प्रस्तौति—प्रयुक्तेति। आत्मना त्वया। प्रयुक्तः कृतः सत्कारविशेषः पूजातिशयो यस्य तं (प्रयुक्त-सत्कार-विशेषम्) मां परम् अन्यं सम्प्रतिपत्तुम् अवगन्तुम्। न अर्हसि। इति वक्तव्यात् ङीप्। हे सन्नत-गात्रि ! सन्नताङ्गि, "अङ्गगात्रकण्ठेभ्यः" यतः कारणात्। मनस ईषिभिः मनीषिभिः विद्वद्भिः; शकन्ध्वादित्वात् साधुः। सतां सङ्गतं सख्यम् सप्तभिः पदैः आपद्यत इति साप्तपदीनं सप्तपदोच्चारणसाध्यम् उच्यते। तच्च आवयोः त्वत्कृतसत्कारप्रयोगादेव सिद्धमित्यर्थः। "साप्तपदीनं सख्यम्" इति निपातनात् साधुः ॥ ३९ ॥

टि०—प्रयुक्त-सत्कार-विशेषम्—प्रयुक्तः सत्कारस्य विशेषः यस्मै सः (बहु०) प्रयुक्तसत्कारविशेषः तम्, 'उसको जिसका विशेष आदर भाव किया गया है'। परम्—पर शब्द यहाँ 'भिन्न व्यक्ति, आगन्तुक' के अर्थ में प्रयुक्त हुआ है। इसके कई अर्थ हैं। देखो,

परः श्रेष्ठारिदूरान्योत्तरे क्लीवं तु केवले । मेदिनी

सम्प्रतिपत्तुम्—सम्+प्रति+√पद्+तुमुन्, 'मानना'; √पद् 'जाना' का अर्थ सम्+प्रति उपसर्गों के साथ बदल जाता है। पार्वती ब्रह्मचारी को अज्ञात व्यक्ति न समझे, ऐसे विचार को दृढ़ करने के लिए कवि ने एक साधारण प्रस्ताव, जो कि संसार में प्रचलित है, प्रस्तुत किया है:—'सन्नतगात्रि! मनीषिभिः सतां सङ्गतं साप्तपदीनम् उच्यते'। सन्नत-गात्रि—सम्यक् नतानि गात्राणि यस्याः सा सन्नतगात्री, तत्सम्बुद्धौ; सन्नत का अर्थ 'झुका हुआ' तथा 'सुन्दर' भी है। पहले अर्थ में इसमें गोल अंगों का बोध होगा और दूसरे अर्थ में सुन्दर। 'नतं चारु सन्नतम्' भोज। स्त्रीलिङ्ग रूप बनाने के लिए सन्नतगात्र को ङीष् प्रत्यय समास के दूसरे पद को विकल्प से जोड़ दिया जाता है। (वा० अङ्गगात्र-कण्ठेभ्यो वक्तव्यम्)। दूसरा रूप होगा सन्नतगात्रा। मनीषिभिः—मनस्+ईषा+इनि, तृतीया बहु०। साप्तपदीनम्—सप्तानां पदानां समाहारः सप्तपदम् (द्विगु) सप्तपदैः (सप्तभिः पदैः) प्राप्यते इति तत् सप्तपद+खञ् (=ईन्); 'सात पगों अथवा सात शब्दों द्वारा सिद्ध'। इसका प्रयोग यहाँ मित्रता के अर्थ में किया गया है, अतः यह रूप नियम विरुद्ध बना है। (साप्तपदीनं सख्यम् पा० ५. २. २२)। हिन्दुओं के विवाह में पति-पत्नी अग्नि की सात बार प्रदक्षिणा करते हैं और इससे सदैव के लिए विवाह-बन्धन में बँध जाते हैं। यदि हम 'पद' 'शब्द' के अर्थ में लें तो इस समास का अर्थ होगा, 'मित्रता सात शब्दों के उच्चारण से होती है।' देखो, **सम्बन्धमाभाषणपूर्वमाहुः** रघु० २. ५८। "सख्यं साप्तपदीनं स्यात्" अमर। यहाँ पद्य में 'पद' शब्द 'शब्द' के अर्थ में प्रयुक्त हुआ है।

हिन्दी—तुमने मेरा विशेष सत्कार किया है, अतएव मुझे पर-पुरुष मानना तुम्हें उचित नहीं है, क्योंकि, हे सुन्दरि! विद्वानों ने कहा है कि सज्जनों की मैत्री सात पदों द्वारा प्राप्त होती है। [३९]

अतोऽत्र किञ्चिद् भवतीं बहुक्षमां
द्विजाति-भावादुपपन्न-चापलः।
अयं जनः प्रष्टुमनास्तपोधने!
न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ ४० ॥

अन्वयः—(हे) तपोधने ! अतः अत्र बहु-क्षमां भवतीं द्विजाति-भावात् उपपन्न-चापलः अयं जनः किञ्चित् प्रष्टुमनाः रहस्यं न चेत् प्रतिवक्तु म् अर्हसि।

वाच्यपरि०—....उपपन्नचापलेन अनेन जनेन ....प्रष्टु मनसा (भूयते)। रहस्येन....(भूयते)। ....अर्ह्यते।

श०—द्विजाति-भाव—ब्राह्मणत्व। उपपन्न—सुलभ। चापल—चपलता। बहु-क्षमा—क्षमावती। प्रष्टुमनाः—पूछने की इच्छावाला। रहस्य—गोपनीय बात।

मल्लि०—अत इति। हे तपोधने ! अतः सख्याद्धेतोः। अत्र प्रस्तावे। बहु-क्षमां बहूक्तिसहाम्, यद्वा क्षमावतीं। भवतीं त्वाम्। द्विजाति-भावात्—ब्राह्मणत्वात्। उपपन्न-चापलः सुलभधाष्टर्यः। अयं जनः स्वयमित्यर्थः। किञ्चित् प्रष्टु मनो यस्य स प्रष्टुमनाः प्रष्टुकामः, "तुं काममनसोरपि" इति मकारलोपः। रहसि भवं रहस्यं गोप्यं न चेत् प्रतिवक्तुम् अर्हसि॥ ४०॥

टि०—तपोधने—तप एव धनं यस्याः सा (बहु०) तपोधना, 'जिसका धन उसकी तपस्या ही है', तत्सम्बुद्धौ। द्विजातिभावात्—द्वे जाती यस्य स द्विजातिः (बहु०) तस्य भावः तस्मात्, 'ब्राह्मणत्व के नाते'; 'जाति' शब्द का अर्थ 'जन्म' है। पहली तीन जातियाँ द्विजाति कहलाती हैं, क्योंकि उनके दो जन्म होते हैं, एक तो माता-पिता द्वारा और दूसरा गुरु से।

मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात्।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः॥

यहाँ 'द्विजाति' का अर्थ है ब्राह्मण; क्योंकि शिव ने ब्राह्मण का वेश धारण कर रखा था और 'उपपन्नचापलः' समास भी ब्राह्मण की ओर विशेष रूप से संकेत करता है, ब्राह्मण स्वभाव से जिज्ञासु होता है। उपपन्न-चापलः—उपपन्नं चापलं यस्य सः (बहु०), 'वह जिसमें चपलता सुलभ होती है।' 'चापल' शब्द प्रश्नात्मक भाव को सूचित करता है, क्योंकि वह ब्राह्मण होने के नाते इस स्वाभाविक प्रवृत्ति के वश में था। बहु-क्षमाम्—बही क्षमा यस्यां सा बहुक्षमा (बहु०),

'अत्यन्त क्षमाशील', ताम् । उसके प्रश्न करने का यह एक और भी कारण है । प्रष्टुमनाः—प्रष्टुं मनो यस्य सः; प्रष्टुम्—√प्रच्छ् +तुमुन् । काम और मनस् के पहले तुमुन् के पञ्चम का लोप हो जाता है । (लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि) । न चेद्रहस्यम्—इससे शिव की विनय प्रकट होती है ।

हिन्दी—हे तपस्विनी ! अतएव (मित्रता के कारण) तुझ बहुत क्षमाशील से मैं ब्राह्मण-स्वभाव की चपलता के कारण कुछ पूछना चाहता हूँ । यदि कुछ रहस्य न हो तो तुम्हें उत्तर देना चाहिये । [४०]

कुले प्रसूतिः प्रथमस्य वेधस-
स्त्रिलोक-सौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्य - सुखं नवं वय-
स्तपःफलं स्यात् किमतः परं वद ॥ ४१ ॥

अन्वयः—प्रथमस्य वेधसः कुले प्रसूतिः, वपुः त्रिलोक-सौन्दर्यम् इव उदितम्, ऐश्वर्य-सुखम् अमृग्यम्, वयः नवम्, अतः परं किं तपःफलं स्यात् वद ।

वाच्यपरि०—...प्रसूत्या (भूयते), वपुषा त्रिलोकसौन्दर्येण··· उदितम्, ऐश्वर्यसुखेन अमृग्येण (भूयते), वयसा नवेन (भूयते), अतः परेण केन तपःफलेन भूयते, उच्यताम् ।

श०—वेधस्—ब्रह्मा, सृष्टिकर्त्ता । प्रसूति—जन्म । वपुस्—शरीर । उदित—संचित । अमृग्यम्—न ढूँढ़ने योग्य ।

मल्लि०—प्रष्टव्यमाह—कुल इति । प्रथमस्य वेधसः हिरण्यगर्भस्य । कुले अन्ववाये । प्रसूतिः उत्पत्तिः, "यज्ञार्थं हि मया सृष्टो हिमवानचलेश्वरः" इति ब्रह्मपुराणवचनात् । वपुः शरीरम् । (त्रिलोक-सौन्दर्यं) त्रयाणां लोकानां सौन्दर्यम् । इव उदितम् एकत्र समाहृतम्, ऐश्वर्य-सुखं सम्पत्सुखम् । अमृग्यम् अन्वेषणीयं न भवति, किन्तु सिद्धमेवेत्यर्थः । वयः नवं यौवनमित्यर्थः । अतः परम् अतोऽन्यत् । किं तपःफलं स्यात्, वद अस्ति चेदिति शेषः । न किञ्चित् अस्तीत्यर्थः ॥ ४१ ॥

टि०—प्रथमस्य वेधसः—हिरण्यगर्भ का। हिरण्यगर्भ द्वारा हिमवत् पर्वत यज्ञ के लिए बनाया गया था। इस विचार की पुष्टि के लिए मल्लिनाथ ने ब्रह्मपुराण में से निम्न पङ्क्ति उद्धृत की हैः—"यज्ञार्थं हि मया सृष्टो हिमवानचलेश्वरः।" इससे पार्वती की कुलीनता सिद्ध होती है। त्रिलोक-सौन्दर्यम्—त्र्यवयवो लोकस्त्रिलोकस्तस्य सौन्दर्यम्। इस समास का विग्रह 'त्रयाणां लोकानां समाहारः' इस प्रकार न होगा क्योंकि इस विग्रह से समास का रूप 'त्रिलोकी' होगा, उनका शरीर त्रिलोकी के रूप-सौन्दर्य की संचित धन-राशि का कोष बताया गया है। देखो,

सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव॥ कुमार० १.४६

ऐश्वर्य-सुखम्—ऐश्वर्यस्य सुखम्, 'सम्पत्ति का सुख'। अमृग्यम्—न मृग्यम्, √मृग् 'ढूँढ़ना' १० आ०+यत्। पार्वती के पितृ-गृह में सब प्रकार की धन-सम्पत्ति भरी पड़ी थी, अतः उसे धन के लिए प्रयत्न करने की आवश्यकता न थी। काले ने इसी भाव का पद्य पार्वती-परिणय में से उद्धृत किया हैः—

जन्मान्ववाये प्रथमस्य धातुः पिता गरीयान् गिरिः सार्वभौमः।
वपुर्मनोहारि वचश्च रम्यं पदं च लोकादतिलोकमस्याः॥

नवं वयः—कालिदास ने यही शब्द रघुवंश में दोहराये हैः—

एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च। रघु० २.४७

शिव ने आश्चर्य का अभिनय करते हुए पार्वती से पूछा कि तुमने तपस्या का आश्रय क्यों लिया क्योंकि तुममें वह सब कुछ है, जिसके लिए लोग तप-साधन करते हैं।

हिन्दी—तुम्हारा जन्म पहले प्रजापति के वंश में हुआ है, यह शरीर मानो तीनों लोकों का संचित सौन्दर्य ही है, ऐश्वर्य का सुख तुम्हें ढूँढ़ना नहीं पड़ता, और यह यौवन, फिर बता, इससे अधिक तपस्या का फल क्या होगा? [४१]

भवत्यनिष्टादपि नाम दुःसहा-
न्मनस्विनीनां प्रतिपत्तिरीदृशी।

विचार - मार्ग - प्रहितेन चेतसा
न दृश्यते तच्च कृशोदरि ! त्वयि ॥ ४२ ॥

अन्वयः—दुःसहात् अनिष्टादपि मनस्विनीनाम् ईदृशी प्रतिपत्तिः भवति नाम, (हे) कृशोदरि ! विचार-मार्ग-प्रहितेन चेतसा तत् च त्वयि न दृश्यते ।

वाच्यपरि०—....ईदृश्या प्रतिपत्त्या भूयते । ....पश्यामि ।

श०—दुःसह—कठिनता से सहने योग्य, असह्य । अनिष्ट—अप्रिय । मनस्विनी—मानिनी । प्रतिपत्ति—प्रवृत्ति । कृशोदरि—पतली कमर वाली । विचार-मार्ग—विचार-पथ । प्रहित—प्रेषित ।

मल्लि०—भवतीति । दुःसहात् सोढुमशक्यात् । अनिष्टात् भर्त्रादिकृतादपि मनस्विनीनां धीरस्त्रीणाम् । ईदृशी तपश्चरणलक्षणा । प्रतिपत्तिः प्रवृत्तिः, "प्रतिपत्तिस्तु गौरवे । प्राप्तौ प्रवृत्तौ प्रागल्भ्ये" इति केशवः । भवति नाम नामेति सम्भावनायाम् । विचार-मार्ग-प्रहितेन विचारमार्गे प्रहितेन । चेतसा चित्तेन । तत् अनिष्टं च हे कृशोदरि, त्वयि न दृश्यते । विचार्यमाणे तदपि नास्ति असम्भावितत्वादित्यर्थः ॥ ४२ ॥

टि०—दुःसहात्—दुःखेन सह्यत इति तस्मात्, दुर् √सह्+खल् (ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् पा० ३. ३. १२६) । यह 'अनिष्टात्' का विशेषण है । अनिष्टात्—न इष्टम् (√इष् 'इच्छा करना' +क्त) अनिष्टं (नञ् तत्पु०), तस्मात्, 'अप्रिय कार्य अथवा वस्तु से' । मनस्विनीनाम्—प्रशस्तं मनो यासां ताः मनस्विन्यः, तासाम्; मनस्विनी—मनस् + विनिः+ ङीप् । प्रतिपत्तिः—प्रति +√ पद्+ क्तिन् । इस शब्द का प्रयोग 'प्रवृत्ति' के अर्थ में हुआ है । मल्लिनाथ ने केशव को उद्धृत किया है:—"प्रतिपत्तिस्तु गौरवे । प्राप्तौ प्रवृत्तौ प्रागल्भ्ये ।" नाम—अव्यय, इस शब्द का प्रयोग 'सम्भावना' के अर्थ में हुआ है । शिव के कहने का तात्पर्य यह है कि मनस्विनी स्त्रियाँ ऐसी कठोर तपश्चर्या का आश्रय तभी ग्रहण करती हैं जब किसी ने उनका कोई भारी अपराध किया हो । अगली दो पंक्तियों में शिव ने उसके प्रति किये गये अपराध को खोज निकालने में अपनी असमर्थता प्रकट की

है। अतएव पार्वती का ऐसी कठोर तपस्या साधने का कारण उन्हें स्पष्ट नहीं होता। यद्यपि शिव सर्वज्ञ हैं और वे तपस्या का कारण समझ जाते हैं, तथापि वेश बदले रहने के कारण वे अज्ञान का अभिनय करते हैं, और विविध प्रस्तावों को प्रस्तुत करके पार्वती से ही अपने प्रति उसके मनोभावों की थाह लेने का अभिनय करते हैं। कृशोदरि—(कृश + उदर + ङीप्) कृशम् उदरं यस्याः सा कृशोदरी, सम्बोधने कृशोदरि, हे सूक्ष्म कटिवाली। 'नासिकोदरौष्ठजंघादन्तकर्णशृङ्गाच्च' (पा० ४. १. ५५.) द्वारा ङीप् विकल्प से है, अर्थात् नासिका आदि शब्द जिस बहुव्रीहि के अंत में है, वहाँ ङीप् प्रत्यय विकल्प से लगता है, अतः दूसरा रूप कृशोदरा सिद्ध होगा। विचार-मार्ग-प्रहितेन—विचारस्य मार्गः विचारमार्गः, तस्मिन् प्रहितं विचारमार्गप्रहितम्, तेन; 'अधिक विचार करने पर'। चेतसा—चित्तेन, 'मन द्वारा'। तत्—अनिष्ट।

हिन्दी—असह्य दुःख के कारण भी धीरजवाली स्त्रियों की ऐसी प्रवृत्ति होती है। हे कृशोदरि! अधिक विचार करने पर (भी) कोई दुःख तुम्हारे ऊपर आया दिखाई नहीं देता। [४२]

अलभ्य - शोकाभिभवेयमाकृति-
विमानना सुभ्रु ! कुतः पितुर्गृहे।
पराभिमर्शो न तवास्ति कः करं
*प्रसारयेत् पन्नग - रत्न - सूचये॥ ४३ ॥**

अन्वयः—(हे) सुभ्रु ! इयम् आकृतिः अलभ्यशोकाभिभवा, पितुः गृहे विमानना कुतः ? पराभिमर्शः तव न अस्ति, पन्नग-रत्न-सूचये कः करं प्रसारयेत् ?

वाच्यपरि०—इमाम् ....आकृतिम् अलभ्यशोकाभिभवां (पश्यामि), ...विमाननया (भूयते), ...पराभिमर्शेन.... (भूयते), ... केन करः.... प्रसार्येत।

श०—आकृति—मूर्ति। अभिभव—तिरस्कार। विमानना—तिरस्कार, अपमान। अभिमर्श—स्पर्श, बलात्कार। पन्नग—साँप। रत्नसूचि—(सर्प-) मणि की नोक। प्रसारयेत्—फैलाये।

मल्लि०—अनिष्टाभावमेव प्रपञ्चयति—अलभ्येति। हे सुभ्रु! इयं त्वदीया आकृतिः मूर्तिः। (अलभ्यशोकाभिभवा) अलभ्यः लब्धुमनर्हः शोकेन भर्त्राद्यवमानजेन दुःखेन अभिभवः तिरस्कारो यस्याः सा तथोक्ता दृश्यते इति शेषः; असम्भावितश्चायमर्थ इत्याह—पितुर्गृहे विमानना अवमानः कुतः? न सम्भाव्यत एवेत्यर्थः। न चाप्यन्यस्माद्भावीत्याह—पराभिमर्शः परधर्षणं तु तव न अस्ति। पन्नग-रत्न-सूचये फणिशिरोमणिशलाकां ग्रहीतुमित्यर्थः। क्रियार्थोपपदस्य च कर्मणि स्थानिनः इति चतुर्थी। करं हस्तं कः प्रसारयेत्। सुभ्रु इत्यत्र भ्रू शब्दस्यावङ्स्थानीयत्वात् 'नेयङुवङ्स्थानावस्त्री" इति नदीसंज्ञाप्रतिषेधात् "अम्बार्थनद्योर्ह्रस्वः" इति ह्रस्वत्वं नास्ति, तेन ह्रस्वः प्रामादिक इति केचित्। अन्ये तु 'अप्राणिजातेश्चारज्ज्वादीनाम्' इत्यत्र अलाबूः कर्कन्धूरित्यूकारान्तादप्यूङ्-प्रत्ययमुदाजहार भाष्यकारः। एतस्मादेव नियमज्ञापकात् क्वचिदूकारान्तस्याप्यूङन्तत्वान्नदीत्वे ह्रस्वत्वमित्याहुः। अत एवमाह वामनः—"ऊकारान्तादप्यूङ् प्रकृतेः" इति। सुभ्रू! कुतस्तातगृहेऽवमाननम्' इति पाठान्तरकरणं तु साहसमेवोक्तोपपत्तिसम्भवात्। अन्यत्रापि "सुभ्रु, त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषिताम्" इत्यादिप्रयोगदर्शनाद् वंशस्थवृत्ते पादादौ जगणभङ्गप्रसङ्गाच्चेत्यलं गोष्ठीभिः॥ ४३॥

टि०—अलभ्यशोकाभिभवा—अलभ्यः शोकेन अभिभवः यस्याः सा (बहु०), 'जो तिरस्कार के शोक को कभी सहन नहीं कर सकती'; अलभ्य—न लभ्यः अलभ्यः (नञ् तत्पु०); लभ्य—√ लभ् + यत्। यह प्रायः कहा जाता है कि सुन्दर आकृतियों को शोक प्राप्त नहीं होता। मल्लिनाथ ने इसमें पति द्वारा तिरस्कार भी गिन लिया है परन्तु पार्वती अविवाहिता थी, इसलिए इसकी सम्भावना ही नहीं हो सकती। सुभ्रु—शोभने भ्रुवौ यस्याः सा सुभ्रू (बहु०), सम्बोधन। ऊ का सुभ्रु में ह्रस्व होना पाणिनि के विरुद्ध है; क्योंकि यह नदीसंज्ञक नहीं है, और इसने उवङ् प्रत्यय लिया है (नेयङुवङ्स्थानावस्त्री पा० १.४.४), अतः यह अम्बार्थनद्योर्ह्रस्वः (पा० ७.३.१०७) सूत्र के अधीन नहीं आता। देखो, भट्टोजिः—"कथं तर्हि हा पितः क्वासि हे सुभ्रु!" इति

भक्तिः। प्रमाद एवायमिति बहवः।" इस रूप की पुष्टि में कुछ कहना है। क्योंकि भाष्यकार ने "अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम्" पर अपने भाष्य में अलाबू, कर्कन्धू का उदाहरण दिया है, इससे स्पष्ट है कि कभी-कभी ऊकारान्त शब्द भी ऊङ् प्रत्यय ग्रहण करते हैं और नदीसंज्ञक कहलाते हैं। देखो, वामन 'ऊकारादप्यूङ् प्रकृतेः'। इस प्रकार सुभ्रु को उवङ् के बदले ऊङ् जोड़े जाने पर नदी-संज्ञा (नेयङुवङ्स्थानावस्त्री पा० १. ४. ४) का निषेध लागू न होगा और यह अम्बार्थनद्योर्ह्रस्वः (पा० ७. ३. १०७) का उचित उदाहरण होगा। मल्लिनाथ ने निम्न उद्धरण दिया है जिसमें सुभ्रूः के बदले सुभ्रु पाठ लिया है:—

सुभ्रु, त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषिताम्।

पराभिमर्शः—परेण अभिमर्शः, दूसरे से स्पर्श किया जाना। अभिमर्श—अभि + √ मृश् + घञ्। पन्नग-रत्न-सूचये —रत्नस्य सूचिः रत्नसूचिः, पन्नगस्य रत्नसूचिः पन्नगरत्नसूचिः तस्यै, पन्नगरत्नसूचिं ग्रहीतुमित्यर्थः, 'साँप की मणि का अग्र-भाग पाने के लिए'; यहाँ चतुर्थी का प्रयोग किया गया है। देखो, क्रियार्थोपपदस्य कर्मणि स्थानिनः पा० २. ३. १४। यह एक पुरानी धारणा है कि साँपों की एक विशेष जाति होती है जो चमकीली मणि को अपने फण में धारण किये रहती है। वासुकि शब्द भी, जिसका पर्याय साँप है, वास्तव में यही भाव प्रकट करता है। वसूनि (रत्नानि) के (मूर्धनि) यस्य सः वसुकः, तस्यापत्यम्। देखो,

ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते ॥ कुमार० २. ३८

पार्वती का शरीर स्पर्श करने में ऐसा भयानक है जैसा साँप के फण की मणि का छूना। अतः इसमें बलात्कार का कोई प्रश्न ही नहीं उठता।

हिन्दी—हे सुन्दरि! यह तुम्हारा शरीर दुःख द्वारा तिरस्कार प्राप्त करने के योग्य नहीं; पिता के घर में तुम्हें भला अपमान कहाँ से (हो सकता है)? पर-पुरुष द्वारा अपमान तुम्हारा हो नहीं सकता। सर्प-मणि की नोक को प्राप्त करने के लिए कौन भला हाथ पसारता है? [४३]

किमित्यपास्याऽऽभरणानि यौवने
धृतं त्वया वार्द्धक-शोभि वल्कलम् ।
वद प्रदोषे स्फुट-चन्द्र-तारका
विभावरी यद्यरुणाय कल्पते ॥ ४४ ॥

अन्वयः—(गौरि !) किमिति यौवने त्वया आभरणानि अपास्य वार्द्धक-शोभि वल्कलं धृतम् ? प्रदोषे स्फुट-चन्द्र-तारका विभावरी अरुणाय कल्पते यदि (किं) वद ।

वाच्यपरि०—.....त्वं.....धृतवती ।.....स्फुटचन्द्रतारका विभावर्या..... कल्प्यते,.....उद्यताम् ।

श०—आभरण—आभूषण । अपास्य—त्याग कर । वार्द्धक—बुढ़ापा । विभावरी—रात्रि । प्रदोष—रात्रि का पहला पहर । अरुण—उषाकाल । सूर्य—सारथि ।

मल्लि०—किमिति । हे गौरि ! किमिति ? केन हेतुना यौवने त्वया आभरणानि अपास्य विहाय । वृद्धस्य भावो वार्द्धकम् "मनोज्ञादित्वाद्" वुञ् प्रत्ययः, "वार्द्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणि" इति विश्वः; तत्र शोभत इति वार्द्धकशोभि वल्कलं धृतम् । प्रदोषे रजनीमुखे । स्फुटाः प्रकटाश्चन्द्र-तारकाश्च यस्याः सा स्फुट-चन्द्र-तारका । विभावरी रात्रिः । अरुणाय सूर्य-सूताय कल्पते यदि ? अरुणं गन्तुं कल्पते किम् ? वद ब्रूहि । "क्रियार्थोप-पदस्य" इत्यादिना चतुर्थी । दीप्यमानशशाङ्कतारके प्रदोषे यद्यरुण उदेति ततो विभूषणापहारेण तव वल्कलधारणं सङ्गच्छत इति भावः ॥ ४४ ॥

टि०—अपास्य—अप+√अस् ४ पर० 'फेंकना'+ क्त (=ल्यप्) । वार्द्धक-शोभि—वार्द्धके शोभते इति (तत्पु०); वार्द्धकं+√ शुभ् + णिनि । यह 'वल्कलम्' का विशेषण है । वार्द्धक—वृद्धस्य भावः, 'बुढ़ापा' । यह शब्द मनोज्ञादि वर्ग में सम्मिलित करने से बना है । वृद्ध को वुञ् जोड़ा जाता है । (द्वन्द्वमनोज्ञादिभ्यश्च पा० ५. १. १३३) । वुञ् के बदले अक हो गया है । (युवोरनाकौ पा० ७. १. १) । शिव ने पार्वती से यह कहा कि तुमने जो वल्कल धारण कर रखे हैं वह बुढ़ापे के लिए उपयुक्त हैं न कि इस भरे यौवन के लिए । देखो,

काममनुरूपमस्या वयसो वल्कलम्' शाकु०

स्फुट-चन्द्र-तारका—स्फुटाः चन्द्रः तारकाश्च यस्यां सा (बहु०), चमकते चन्द्रमा और ताराओं से युक्त । प्रदोषे—रात के पहले पहर में; (देखो, प्रदोषो रजनीमुखम्) । अरुणाय—उषाकाल के लिए । अरुण—अरुण कश्यप और विनता का पुत्र तथा गरुड़ का भाई था । वह सूर्य का सारथि कहा जाता है । यहाँ यह शब्द उषा के लिए प्रयुक्त हुआ है । इस शब्द के भिन्न-भिन्न अर्थों के लिए देखो टि० पृष्ठ ३६ । रात्रि का आरम्भ होते समय जब चन्द्रमा तथा तारागण चमकते हैं तब रात्रि यह कभी विचार नहीं करती कि उषाकाल आयेगा । यहाँ पार्वती अपने यौवन में रात्रि के प्रथम पहर के सदृश मानी गई है, उसके आभूषण चन्द्रमा और तारे तथा उसके वल्कल वस्त्र भूरे रंग के होने के कारण उषा के-से माने गये हैं । इस अन्तर द्वारा शिव ने पार्वती के आचरण की अस्वाभाविकता प्रकट की है ।

हिन्दी—पार्वती का अभिप्राय जाननेवाली उस (सखी) से इस प्रकार, वास्तविक भाव गुप्त न रख कर, निवेदन किया गया वह सुन्दर ब्रह्मचारी, हर्ष के चिह्न प्रकट किए बिना, उमा से पूछने लगा—"अरे ! यह बात ऐसे है वा हँसी है ?" [६२]

अथाग्र-हस्ते मुकुलीकृताङ्गुलौ
समर्पयन्ती स्फटिकाक्ष-मालिकाम् ।
कथञ्चिदद्रे स्तनया मिताक्षरं
चिर-व्यवस्थापित - वागभाषत ॥ ६३ ॥

अन्वयः—अथ अद्रेः तनया मुकुलीकृताङ्गुलौ अग्र-हस्ते स्फटिकाक्ष-मालिकां समर्पयन्ती चिर-व्यवस्थापित-वाक् कथञ्चित् मिताक्षरम् अभाषत ।

वाच्यपरि०—....तनयया....समर्पयन्त्या चिर-व्यवस्थापित-वाचा.... अभाष्यत ।

श०—मुकुलीकृत—अञ्जलि-बद्ध । स्फटिक—स्फटिक पत्थर । अक्ष-मालिका—जपमाला । अद्रि—पर्वत । तनया—पुत्री । मिताक्षरम्—नपे-तुले अक्षर । चिर-व्यवस्थापित-वाक्—जिसने देर के बाद अपनी वाणी को निश्चित किया ।

मल्लि०—अथेति। अथ अनन्तरम् अद्रेः तनया पार्वती मुकुलीकृताङ्गुलौ सम्पुटीकृताङ्गुलौ अग्रश्चासौ हस्तश्चेति समानाधिकरणसमासः, "हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदात्।" (५. २. २०) इति वामनः, तस्मिन् अग्र-हस्ते। (स्फटिकाक्ष-मालिकाम्) स्फटिकानामक्षमालिकां जपमालिकाम् समर्पयन्ती आमुञ्चती कथञ्चित् महता कष्टेन चिर-व्यवस्थापित-वाक् एतेन लज्जोपरोधो व्यज्यते। मिताक्षरं परिमितवर्णं यथा तथा अभाषत बभाषे॥ ६३॥

टि०—अद्रेः तनया—हिमालय पर्वत की पुत्री, अर्थात् पार्वती। मुकुलीकृताङ्गुलौ—अमुकुलाः मुकुलाः कृता इति अमुकुलीकृतः, मुकुल+च्वि+कृताः (कृभ्वस्तियोगे संपद्यकर्तरि च्विः पा० ५.४.५०); मुकुलीकृताः अङ्गुलयो यस्य सः (बहु०) तस्मिन्, जिसकी अगुलियाँ कली के रूप में बन्द थीं। अग्र-हस्ते—अग्रश्चासौ हस्तश्चेति (कर्म०), हाथ का अगला भाग। यहाँ यह आपत्ति की जा सकती है कि अग्र और हस्त परस्पर समान नहीं है और इसलिए कर्मधारय नहीं हो सकता। परन्तु यह कहा जा सकता है कि यह दोनों शब्द अवयव और अवयविन् के सम्बन्ध द्वारा एक समान हैं। वामन ने इस सूत्र द्वारा 'हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदात्' ऐसे रूप समझाये हैं। यदि यह षष्ठीतत्पुरुष लिया जाय तो रूप होगा 'हस्ताग्रम्'। एक मतानुसार ऐसे समास षष्ठीतत्पुरुष होते हैं और राजदन्तादि वर्ग में सम्मिलित किये गये हैं। अतएव समास का दूसरा शब्द पहला स्थान ग्रहण कर लेता है। स्फटिकाक्ष-मालिकाम्—स्फटिकानाम् अक्षमालिका (षष्ठीतत्पु०), 'स्फटिक पत्थरों की माला', ताम्। चिर-व्यवस्थापित-वाक्—चिरेण व्यवस्थापिता वाक् यथा (बहु०) सा, 'जिसने चिरकाल के पश्चात् अपनी वाणी को वश में किया'। इससे प्रतीत होता है कि बोलने से पहले पार्वती काफी देर तक रुकी रही। इससे यह भी स्पष्ट है कि उसका अपनी वाणी और लज्जा पर पूरा वश था। कन्यायें प्रायः पुरुष के सामने अपना प्रेम प्रकट करने में लजाती हैं। मिताक्षरम्—मितानि अक्षराणि यस्मिन् (बहु०) (कर्मणि) तद्यथा स्यात्तथा (अव्ययी०), 'नपे-तुले अक्षर'। अभाषत—√भाष् 'बोलना' लङ्, उत्तम पु० एक०।

हिन्दी—तब पर्वत-दुहिता (पार्वती) ने स्फटिक पत्थर की माला को अपने हाथ के अगले भाग पर, जिसकी अंगुलियाँ अध-खिले फूल के समान थीं, रखा और बड़े प्रयत्न से, चिरकाल में वक्तव्य को निश्चित कर, थोड़े अक्षरों में कहा। [६३]

यथा श्रुतं वेद-विदां वर ! त्वया
जनोऽयमुच्चैःपद - लङ्घनोत्सुकः ।
तपः किलेदं तदवाप्ति - साधनं ।
*मनोरथानामगतिर्न विद्यते ।। ६४ ।।**

अन्वयः—(हे) वेद-विदां वर ! त्वया यथा श्रुतम् अयं जनः उच्चैःपद-लङ्घनोत्सुकः इदं तपः तदवाप्ति-साधनं किल, मनोरथानाम् अगतिः न विद्यते ।

वाच्यपरि०—....त्वं श्रुतवान्, अनेन जनेन उच्चैःपद-लङ्घनोत्सुकेन (भूयते), अनेन तपसा तदवाप्ति-साधनेन....(भूयते),....अगत्या.... ।

श०—उत्सुक—लालायित । लङ्घन—प्राप्त करना (मूलार्थ 'आक्रमण करना, पार करना') । अवाप्ति—प्राप्ति । साधन—उपाय । अगति—विषय का अभाव, अगम्यता ।

मल्लि०—यथेति हे वेदविदां वर ! वैदिकश्रेष्ठ ! त्वया यथा श्रुतं सम्यक् श्रुतम् । श्रुतार्थमेवाऽऽह—अयं जनः स्वयमित्यर्थः । (उच्चैःपद-लङ्घनोत्सुकः) उच्चैःपदस्य शिवलाभरूपोन्नतस्थानस्य लङ्घने आक्रमणे उत्सुकः किमत्रायुक्तमित्यत्राऽऽह—इदं तपः (तदवाप्ति-साधनं) तदवाप्तेः तस्य उच्चैःपदस्य अवाप्तेः प्राप्तेः साधनम् । किल क्लिेत्यलीके । अति तुच्छत्वात् असाधकमेवेत्यर्थः । तर्हि त्यज्यतामित्याशङ्क्य दुराशा मां न मुञ्चतीत्याशयेन आह - मनोरथानां कामानाम् । अगतिः अविषयः न विद्यते । न हि स्वशक्तिपर्यालोचनया कामाः प्रवर्तन्त इति भावः ।।६४।।

टि०—वेद-विदाम्—वेदं विदन्तीति वेदविदः तेषाम्, वेद-विशारदों का । वर—सम्बोधन एक० 'श्रेष्ठ'; इस सम्बोधन द्वारा पार्वती शिव को, जो ब्रह्मचारी के वेष में थे, बुलाती है । त्वया यथा श्रुतम्—जैसा तुमने सुना है । तथा के बाद यथा शब्द जोड़ना चाहिए । यथा का अर्थ

होगा 'वस्तुतः'। 'त्वया यथा श्रुतम्' का अर्थ होगा 'जैसा कि तुमने ठीक सुना है'। इस अर्थ द्वारा यथा के पश्चात् तथा शब्द जोड़ने की कोई आवश्यकता नहीं रहती। अयं जनः—इससे पार्वती की ओर संकेत है। उच्चैःपद-लङ्घनोत्सुकः—उच्चैः पदस्य लङ्घने उत्सुकः (तत्पु०), 'उच्च पद की प्राप्ति के लिए उत्सुक'। इससे उसका शिव के साथ मनोवाञ्छित विवाह का बोध होता है। 'लङ्घन' शब्द जिसका अर्थ है 'पार करना' यहाँ केवल 'प्राप्ति' के अर्थ में प्रयुक्त किया गया है, क्योंकि पार्वती उस पद को प्राप्त हो जायगी, जिसे शिव ने प्राप्त कर रखा है। तदवाप्ति-साधनम्—तस्याः अवाप्तेः साधनम् (तत्पु०), उसके पाने का साधन। किल—झूठमूठ। देखो, मल्लिनाथ "किलेत्यलीके"; तप, इसकी प्राप्ति का साधन हो, ऐसा प्रतीत नहीं होता। पार्वती तप में अपना विश्वास खो चुकी थी। मनोरथानामगतिर्न विद्यते—अभिलाषा के लिए कोई भी पदार्थ अगोचर नहीं है। अभिलाषा किसी भी पदार्थ की प्राप्ति के लिए हो सकती है।

हिन्दी—हे वेदज्ञों में श्रेष्ठ! आपने ठीक सुना है। यह (तुच्छ) जन उच्च पद को प्राप्त करने में उत्सुक है। यह तप उसकी प्राप्ति का साधन कहा जाता है। मनोरथों का कोई अगम्य विषय (स्थान) नहीं होता। [६४]

अथाऽऽह वर्णी विदितो महेश्वर-
स्तदर्थिनी त्वं पुनरेव वर्तसे।
अमङ्गलाभ्यास-रतिं विचिन्त्य तं
तवानुवृत्तिं न च कर्तुमुत्सहे॥ ६५॥

अन्वयः—अथ वर्णी आह—महेश्वरः विदितः, त्वं पुनरेव तदर्थिनी वर्तसे, (अहम्) तम् अमङ्गलाभ्यास-रतिं विचिन्त्य तव अनुवृत्तिं कर्तुं न च उत्सहे।

वाच्यपरि०—....वर्णिना उच्यते, महेश्वरेण विदितेन (भूयते) त्वया....तदर्थिन्या वृत्यते, (मया)....उत्सह्यते।

श०—अमङ्गल—अशुभ। अभ्यास—आचार। रति—प्रीति। अनुवृत्ति—अनुमति, अनुसरण।

मल्लि०—अथेति। अथ वर्णी ब्रह्मचारी, "वर्णिनो ब्रह्मचारिणः" इत्यमरः। आह उवाच इत्यर्थः **'आहेति भूतार्थे लट्प्रयोगो भ्रान्तिमूलः' इत्याह वामनः।** किमित्याह—**महेश्वरः** महादेवः ममेति शेषः। **विदितः** मया ज्ञायत इत्यर्थः। **बुद्ध्यर्थत्वाद् वर्त्तमाने क्तप्रत्ययः तद्योगात् षष्ठी** च। येन त्वं प्राक् भग्नमनोरथा कृतेति भावः पुनरेव त्वं तमीश्वरम् अर्थयसे। तदर्थिन्येव तत्कामैव प्रवर्तसे तत्प्रभावम् अनुभूयापीति भावः। अनुसरणे को दोषस्तत्राऽऽह—(अमङ्गलाभ्यास-रतिं) अमङ्गलाभ्यासे अमङ्गलाचारे रतिर्यस्य तं तथोक्तम्। तम् ईश्वरम्। विचिन्त्य विचार्य। तव अनुवृत्तिम् अनुसरणम्। कर्त्तुं न उत्सहे न अनुमन्तुं शक्नोमीत्यर्थः ॥ ६५ ॥

टि०—आह—वामन के मतानुसार भूतकाल के अर्थ में आह का प्रयोग अशुद्ध है। देखो मल्लिनाथः—

' "आहेति भूतार्थे लट्प्रयोगो भ्रान्तिमूलः" इत्याह वामनः।'

महेश्वरः—महांश्चासौ ईश्वरः इति (कर्म०), महत् महा में बदल जाता है (आन्महतः समानाधिकरणजातीययोः पा० ६.३.४६)। विदितः—ज्ञात, 'विदितः' के पश्चात् 'मया' शब्द जोड़ा जायगा। ब्रह्मचारी के कहने का तात्पर्य यह है कि वह शिव के अशुभ व्यवहारों से भली-भाँति परिचित था। उसे ज्ञात था कि किस प्रकार शिवजी ने काम को जला डाला था, किस प्रकार वे पर्वती को तपस्या के प्रति उदासीन थे, इत्यादि। अतः वह शिव के लिए तप करती हुई पार्वती को देखकर विस्मित हो रहा था। तदर्थिनी—अर्थोऽस्या अस्तीति अर्थिनी, तस्य अर्थिनी, उसके 'लिए अभिलाष करनेवाली'। अमङ्गलाभ्यास-रतिम्—न मङ्गलम् अमङ्गलम्, अमङ्गलस्य अभ्यासे रतिर्यस्य (बहु०) स तम्, 'उसे जो अशुभ क्रियायों में आनन्द अनुभव करता है'। 'अमङ्गल' शब्द द्वारा शिव का विभूति लगाना, कपाल धारण करना, तथा काम-दहन, और पार्वती की तपस्या के प्रति उदासीनता आदि क्रियाओं की ओर संकेत है। अनुवृत्तिम्—अनु+√वृत् 'अनुसरण करना, अनुमति देना'+क्तिन्, द्वितीया। नोत्सहे—'मैं साहस नहीं कर सकता।' काले ने निम्नलिखित पद्य पार्वती-परिणय से उद्धृत किया है:—

आलेपो भसितं विभूषितमहिर्वासः पितॄणां वने
वेतालाः परिचारकाः प्रतिदिनं वृत्तिश्च भिक्षामयी ।
इत्थं यस्य शुभेतराणि चरितान्याख्यान्ति सर्वे जना-
स्तस्मिन्मौग्ध्यवशान्मतिस्तव रुचिं बध्नाति किं ब्रूमहे ॥४.१२

हिन्दी—तब ब्रह्मचारी बोला 'मैं महादेव को जानता हूँ। फिर भी तुम उस की इच्छा करती हो। अशुभ कर्मों में प्रीति रखने वाले उस (शिव) का विचार करके मैं तुम्हारा अनुमोदन करने के लिए साहस नहीं कर सकता।" [६५]

अवस्तु-निर्बन्ध-परे कथं नु ते
करोऽयमामुक्त-विवाह-कौतुकः ।
करेण शम्भोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम् ॥ ६६ ॥

अन्वयः—(हे) अवस्तु-निर्बन्ध-परे! आमुक्त-विवाह-कौतुकः ते अयं करः वलयीकृताहिना शम्भोः करेण तत्प्रथमावलम्बनं कथं नु सहिष्यते?

वाच्यपरि०....आमुक्त-विवाह-कौतुकेन....अनेन करेण....सहिष्यते ।

श०— अवस्तु—तुच्छ वस्तु । निर्बन्ध—हठ । विवाह-कौतुक—कंगना । आमुक्त—धारण किया हुआ । वलय—कड़ा । अहि—साँप । अवलम्बन—ग्रहण करना, पकड़ना ।

मल्लि०—अवस्त्विति । अवस्तुनि तुच्छवस्तुनि निर्बन्धः अभिनिवेशः परं प्रधानं यस्याः तस्याः । सम्बुद्धिः अवस्तु-निर्बन्ध-परे, पार्वति! आमुक्त-विवाह-कौतुकः आमुक्तम् आसञ्जितं विवाहे यत् कौतुकं हस्तसूत्रं तद् यस्य सः । ते अयं करः "कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले" इति शाश्वतः । वलयीकृताहिना भूषणीकृतसर्पेण । शम्भोः महादेवस्य । करेण करणभूतेन । (तत्प्रथमावलम्बनं) तदेव प्रथमं तत्प्रथमम् अपरिचितत्वात् अतिभयङ्करमिति भावः । तच्च तदवलम्बनं ग्रहणञ्चेति कथं नु सहिष्यते, न कथञ्चिदपि सहिष्यत इत्यर्थः । अग्रतो यद्भावि तद् दूरेऽवतिष्ठतां प्रथमं करग्रह एव दुःसह इति भावः ॥ ६६ ॥

टि०—अवस्तु-निर्बन्ध-परे—सम्बोधन एक०; न वस्तु अवस्तु

(नञ् तत्पु०), अवस्तुनि निर्बन्धः परः यस्या सा (बहु०), तत्सम्बुद्धौ, तुम जो एक तुच्छ वस्तु अथवा विषय पर अनुरक्त हो रही हो; अथवा तुम जो शिव पर हृदय न्योछावर किये हो और वह इसका अपात्र है। आमुक्त-विवाह-कौतुकः—आमुक्तं विवाहस्य कौतुकं यस्मिन् (बहु०) सः, वह जिसके (हाथ पर) 'विवाह का कंगना बँधा है'। यह 'करः' का विशेषण है। आमुक्त—आ+मुच्+क्त; √मुच् 'छोड़ना' का अर्थ 'आ' उपसर्ग के साथ बदल कर 'धारण करना' हो जाता है। कौतुक—विवाह का कंगना। इस अर्थ की पुष्टि के लिए मल्लिनाथ ने शाश्वत को उद्धृत किया है:—'कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले'। वलयीकृताहिना—अवलयो वलयः कृत इति वलयीकृतः, वलयीकृतः अहिर्यस्मिन् (बहु०) स वलयीकृताहिः तेन, 'जिस के इर्द-गिर्द साँप कड़े के रूप में बाँधा गया है'। तत्प्रथमावलम्बनम्—तदेव प्रथमं तत्प्रथमम्, तत्प्रथमं च तदवलम्बनं तत्प्रथमावलम्बनम् (कर्म०), 'पहली बार पकड़ना'।

ब्रह्मचारी ने विवाह के समय शिव की विचित्र क्रियाओं और पार्वती की परम्परागत प्रवृत्तियों का अन्तर बताया है। अपने घर के रीतिरिवाजों के अनुसार पार्वती विवाह के समय अपनी कलाई पर कंगना बाँधेगी किन्तु शिव, जो असाधारण व्यवहारों में व्यस्त हैं, अपनी कलाई पर साँप बाँधेंगे। यही साँप उनके लिए विवाह के कंगने का काम देगा। जब शिव पार्वती का पाणिग्रहण करेंगे तब यह भयानक दृश्य उपस्थित होगा।

तस्योद्वाहनकाले च हा हा कर्तुं भविष्यति।
भणिकङ्कणसंयोगं यदा ते कङ्कणं भवेत्॥

हिन्दी—हे तुच्छ वस्तु पर अभिलाषा करनेवाली (पार्वति)! विवाह का कंगना बँधा हुआ तुम्हारा यह हाथ शिव के साँप लिपटे हाथ द्वारा पहली बार पकड़े जाने को कैसे सहन करेगा? [६६]

त्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः।
वधू-दुकूलं कलहंस-लक्षणं
गजाजिनं शोणित-बिन्दु-वर्षि च॥ ६७॥

अन्वयः—त्वम् एव तावत् परिचिन्तय, कल-हंस लक्षणं वधू-दुकूलं शोणित-बिन्दु-वर्षि गजाजिनं च एते कदाचित् योगम् अर्हतः यदि ।

वाच्यपरि०—....त्वया ....परिचिन्त्यताम् ....एताभ्यां ...योगः अर्ह्यते... ।

श०—कलहंस—राजहंस । दुकूल—रेशमी वस्त्र । शोणित—रक्त । अजिन—खाल ।

मल्लि०—त्वमेवेति । हे गौरि ! त्वमेव स्वयम् आत्मना । तावत् इति मानार्थे । यावन्मात्रं विचारणीयं तावन्मात्रमित्यर्थः । इदमेव उदाहृतञ्च गणव्याख्याने । परिचिन्तय पर्यालोचय । किमिति ? कल-हंस-लक्षणं कलहंसचिह्नम् "चिह्नं लक्ष्म च लक्षणम्" इत्यमरः । वध्वाः नवोढायाः दुकूलं वधू-दुकूलं "वधूः स्नुषा नवोढा स्त्री" इति विश्वः । तथा (शोणित-बिन्दु-वर्षि) शोणितबिन्दून् वर्षतीति तथोक्तम् आर्द्रमित्यर्थः । गजाजिनञ्च कृत्तिवासश्च तत् पिनाकिन इत्याशयः । एते कदाचित् जातु अपि योगं सङ्गतिम् अर्हतः यदि अर्हतः कम् । एतत् त्वमेव परिचिन्तयेति पूर्वेणान्वयः । पाणिग्रहणे किल वधूवरयोः वस्त्रान्तग्रन्थिः क्रियते । कृत्तिवाससा पाणिपीडने तु दुकूलधारिण्याः तव कथं सङ्घटिष्यत इति भावः ॥ ६७ ॥

टि०—तावत्—तत् परिमाणमस्येति, पर्यन्त; इसका अर्थ 'शीघ्र, सर्व प्रथम' भी है । यह शब्द इस प्रकार बना है:—तत् + 'वतुप्'; तत् के बदले ता हो गया है (आ सर्वनाम्नः पा० ६. ३. ९१)। प्राचीन वैयाकरणों के मतानुसार यह शब्द तत् सर्वनाम को डावतु प्रत्यय जोड़कर बना है ।

कल-हंस-लक्षणम्—कलहंसवत् लक्षणं यस्य (बहु०) तत्, 'हंस के चिह्नों से युक्त' अथवा 'जिस पर हंस अङ्कित है' । यह 'वधू-दुकूलम्' का विशेषण है । वधू-दुकूलम्—वध्वाः दुकूलम् (तत्पु०), 'नई विवाहिता का रेशमी वस्त्र' । शोणित-बिन्दु-वर्षि—शोणितस्य बिन्दून् वर्षतीति तत्, (तत्पु०), 'रक्त की बूँदे बरसानेवाला' । गजाजिनम्—गजस्य अजिनम् (तत्पु०), 'गज की खाल' । यहाँ गज से तात्पर्य गजासुर से है, जिसे शिव ने मारा था । गजासुर के शरीर से उसकी खाल खेंचकर शिव

ने नृत्य किया था। 'शोणित' से तात्पर्य रक्त-बिन्दुओं से है। पार्वती का पाणिग्रहण करने से पहले वह रक्त अवश्य सूख गया होगा। यह अच्छा होता यदि ब्रह्मचारी ने 'रक्त-बिन्दुओं की वर्षा करनेवाला' के बदले 'रक्त-बिन्दुओं से सना' कहा होता। ब्रह्मचारी पार्वती को शिव के साथ विवाह करने के निश्चय से हटाने के विचार से ऐसा कहता है क्योंकि दोनों में असामानता है। कहाँ पार्वती का रेशमी वस्त्र और कहाँ शिव का गज-चर्म ! रेशमी वस्त्र से धनाढ्यता और चर्म से निर्धनता का बोध होता है। इन दोनों में भला कैसा विवाह-सम्बन्ध ? देखो,

ययोरेव समं वित्तं ययोरेव समं कुलम्।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः॥

मल्लिनाथ के अनुसार ब्रह्मचारी के कहने का तात्पर्य यह है कि विवाह के समय कन्या का रेशमी वस्त्र गज-चर्म के साथ कैसे बाँधा जा सकता है ? अतः दोनों का विवाह एक सामान न होने के कारण असम्भव है।

हिन्दी—तुम ही आप इतना तो पहले विचार करो कि नव-विवाहिता वधू का राजहंस से अङ्कित रेशमी वस्त्र और रक्त-बिन्दुओं की वर्षा करनेवाला (शिव का) गज-चर्म ये दोनों कभी मिलाप के योग्य हैं ? [६७]

चतुष्क - पुष्प - प्रकरावकीर्णयोः
परोऽपि को नाम तवानुमन्यते।
अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्ण - केशासु परेत-भूमिषु ॥ ६८ ॥

अन्वयः—चतुष्क-पुष्प-प्रकरावकीर्णयोः तव पादयोः अलक्तकाङ्कानि पदानि विकीर्ण-केशासु परेत-भूमिषु परः अपि कः नाम अनुमन्यते ?

वाच्यपरि०....परेण....केन....अनुमन्यन्ते ?

श०—चतुष्क—गृह-विशेष। प्रकर—ढेर। अवकीर्ण—रखे गये। विकीर्ण—बिखरे। अलक्तक—लाक्षारस। परेत-भूमि—श्मशान-भूमि।

मल्लि०—चतुष्केति। (चतुष्क-पुष्प-प्रकरावकीर्णयोः) चतुष्के गृहविशेषे यः पुष्पप्रकरः, तत्र अवकीर्णयोः न्यस्तयोः कुसुमास्तृतदिव्य-

भवनभूसञ्चारोचितयोरित्यर्थः । तव पादयोः अलक्तकाङ्कानि लाक्षारञ्जितानि पदानि पादाकाराणि पादन्यासचिह्नानि, "पदं शब्दे च वाक्ये च व्यवसायापदेशयोः । पादतच्चिह्नयोः" इति विश्वः । विकीर्णाः विक्षिप्ताः केशाः शवशिरोरुहाः यासु विकीर्ण-केशासु, "अतत्स्थं तत्र दृष्टञ्चेति वचनात्" "स्वाङ्गाच्चोपसर्जनात् असंयोगोपधात्" इति विकल्पात् न ङीष् । परेत-भूमिषु प्रेतभूमिषु श्मशानेषु इत्यर्थः । परोऽपि शत्रुरपि को नाम अनुमन्यते न कोऽपीत्यर्थः । नामेति कुत्सायाम् । पिनाकपाणिपाणिग्रहणे तस्य परेतभूसञ्चारित्वेन साहचर्यात् तवापि तत्र सञ्चारोऽवश्यम्भावीति भावः ॥ ६८ ॥

टि०—चतुष्क-पुष्प-प्रकरावकीर्णयोः—चतुष्के पुष्पाणां प्रकरे अवकीर्णयोः (तत्पु०), 'चौकोर कमरे में फूलों के ढेर पर रखे गये (पैरों) का'; चतुष्क—चतुर + कन् , (संख्य याः संज्ञासङ्घसूत्राध्ययनेषु पा० ५. १. ५८) । पुष्प-प्रकर—फूलों का ढेर; पार्वती चौकोर कमरे के फर्श पर, जो फूलों से भरा होता था, चला करती थीं । अलक्तकाङ्कानि—अलक्तक के चिह्नों से युक्त; पार्वती के पैरों पर अलक्तक लगाई जाती थी । विकीर्ण-केशासु—विकीर्णाः केशाः यासु (बहु०) तासु, '(मृतकों के) बिखरे बालोंवाली (भूमि पर)' । यह बात समझ में नहीं आती कि श्मशान-भूमि पर बाल क्यों बिखरे पड़े थे, क्योंकि शव बालों समेत जला दिया जाता है । अथवा इससे कदाचित् उस रीति की ओर संकेत हो जो कालिदास के समय में प्रचलित होगी कि मृतक के सम्बन्धी अपना सिर घर में न मुँडाकर श्मशान में मुँडाते थे । परेत-भूमिषु—परेतानां भूमिषु (तत्पु०) । परेत—परं लोकम् इतः गत इति, परं दूरम् इत इति वा, 'जो व्यक्ति दूसरे लोक को चला गया है' । अथवा 'जो व्यक्ति दूर की यात्रा पर चला गया है' । परः—शत्रु, देखो,

"अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः" अमर

ब्रह्मचारी के कहने का तात्पर्य यह है कि पार्वती के शत्रु भी यह नहीं चाहेंगे कि वह पार्वती, जो फूलों के ढेरोंवाले फर्श पर चलती थी, बालों से भरी श्मशान-भूमि पर चले ।

हिन्दी—चौकोर कमरे (अथवा चौकोर आँगन) में पुष्पों के ढेरों पर चलने योग्य तुम्हारे पैरों की मुहावर से अङ्कित पद-चिह्न का बिखरे हुये केशोंवाली श्मशान-भूमि पर पड़ना कौन शत्रु भी अनुमोदन करेगा ? [६८]

अयुक्त-रूपं किमतः परं वद
त्रिनेत्र-वक्षः सुलभं तवापि यत् ।
स्तन-द्वयेऽस्मिन् हरिचन्दनास्पदे
पदं चिता-भस्म-रजः करिष्यति ॥ ६९ ॥

अन्वयः—त्रिनेत्र-वक्षः तव सुलभम् अपि अतः परम् अयुक्त-रूपं किम् ? वद, यत् हरिचन्दनास्पदे अस्मिन् स्तन-द्वये चिता-भस्म-रजः पदं करिष्यति ।

वाच्यपरि०—त्रिनेत्र-वक्षसा.... सुलभेन.... (भूयते), ...परेण अयुक्त-रूपेण केन (भूयते), उच्यताम् ....चिता-भस्म-रजसा ....करिष्यते ।

श०—अयुक्त-रूप—अत्यन्त अयुक्त, अनुपयुक्त । त्रिनेत्र—शिव, त्र्यम्बक । आस्पद—स्थान ।

मल्लि०—अयुक्तेति । त्रिनेत्र-वक्षः त्र्यम्बकालिङ्गनमित्यर्थः । तव तत्सम्बन्धितया सुलभम् अपि सुप्रापञ्च भवतीति शेषः । तवेति शेषे षष्ठी, "न लोकाव्यय" इत्यादिना कृद्योगलक्षणषष्ठ्या निषेधात् । अतः परम् अस्मात् त्रिनेत्रवक्षोलाभात् अन्यत् अयुक्त-रूपम् अत्यन्तायुक्तं किं वद, न किञ्चिदित्यर्थः । "प्रशंसायां रूपप्" इति रूपप् प्रत्ययः । कुतः । यत् यस्मात् कारणात् हरिचन्दनास्पदे हरिचन्दनस्य आस्पदे स्थानभूते । अस्मिन् स्तन-द्वये (चिता-भस्म-रजः) चिताभस्म श्मशानभस्म तदेव रजश्चूर्णं कर्तृ, पदं करिष्यति पदं निधास्यति, भर्तुः भवस्य भस्माङ्ग-रागादिति भावः ॥६९॥

टि०—अयुक्त-रूपम्—अतिशयेन युक्तं युक्तरूपम् (युक्त+रूपप्) न युक्तरूपमिति अयुक्तरूपम् (नञ् तत्पु०), 'सर्वथा अनुपयुक्त' । अथवा न युक्तम् अयुक्तम्, प्रशस्तम् अयुक्तम् अयुक्तरूपम्, 'अत्यन्त अनुचित' । रूपप् प्रत्यय अधिकता अथवा प्रशंसा के अर्थ में जोड़ा जाता है । (प्रशंसायां रूपप् पा० ५. ३. ६६) ।

त्रिनेत्र-वक्षः सुलभम्—त्रीणि नेत्राणि यस्य स त्रिनेत्रः (बहु०), त्रिनेत्रस्य वक्षः त्रिनेत्रवक्षः (तत्पु०), तत्र सुलभम् (तत्पु०), 'शिव की छाती पर सहज में प्राप्त होनेवाले'। यह 'चिताभस्मरजः' का विशेषण है। मल्लिनाथ ने वाक्य-रचना इस प्रकार की है:—त्रिनेत्रवक्षः तत्र अपि सुलभम्, अतः परम् अयुक्तरूपं किम् ? 'शिव का आलिंगन जो तुम्हें सहज में ही प्राप्त होगा, उससे बढ़कर, क्या अधिक अनुपयुक्त होगा ? इसमें त्रिनेत्रवक्षः सुलभम् से पृथक् होगा। **चिता-भस्म-रजः**—चिताया भस्म एव रजः (षष्ठी तत्पु०), 'चिता की भस्म के कण'। शिव का शरीर सदैव चिता की भस्म-रज से लिप्त कहा जाता है। **हरिचन्दनास्पदे**—हरिचन्दनस्य आस्पदं तस्मिन्, 'चन्दन-लेप के योग्य स्थान'। हरिचन्दन का भिन्न-भिन्न लेखकों ने भिन्न-भिन्न वर्णन किया है। देखो,

> **घृष्टं च तुलसीकाष्ठं कर्पूरागुरुयोगतः ।**
> **अथवा केशरैर्योज्यं हरिचन्दनमुच्यते ॥ पद्मपुराण**
> हरिचन्दनमस्त्री ख्यात् त्रिदशानां महीरुहे ।
> नपुंसकं तु गोशीर्षे ज्योत्स्नाकुङ्कुमयोरपि ॥ मेदिनी

हरिचन्दन तथा चिता के भस्मरज में भारी असामानता है। शिव की भस्म-रज से भरी छाती पार्वती की हरिचन्दन से अलंकृत छाती के सर्वथा अनुपयुक्त है। अतः उन दोनों का परस्पर सम्बन्ध स्थापित होना अत्यन्त अनुचित है।

हिन्दी—(तुम ही) बताओ, महादेव का वक्षःस्थल तुम्हें सुलभ होने पर भी इससे अधिक अनुचित क्या होगा कि हरिचन्दन के (लेप के) योग्य तुम्हारे इस स्तन-युगल पर चिता के भस्म-कण स्थान पा लेंगे ? [६९]

> *इयं च तेऽन्या पुरतो विडम्बना*
> *यदूढया वारण-राज-हार्यया ।*
> *विलोक्य वृद्धोक्षमधिष्ठितं त्वया*
> *महाजनः स्मेर-मुखो भविष्यति ॥ ७० ॥*

अन्वयः—इयं च ते पुरतः अन्या विडम्बना ऊढया वारणराज

हार्यया त्वया अधिष्ठितं वृद्धोक्षं विलोक्य महाजनः स्मेर-मुखः भविष्यति (इति) यत् ।

वाच्यपरि०—अनया....अन्यया विडम्बनया (भूयते)....महाजनेन स्मेर-मुखेन भविष्यते....येन (भविष्यते) ।

श०—विडम्बना—परिहास । ऊढा—विवाहिता । वारण—हाथी । अधिष्ठित—आरूढ़ । वृद्धोक्ष—(शिव) का बूढ़ा बैल । महाजन—प्रतिष्ठित व्यक्ति । स्मेर—मुस्कान ।

मल्लि०—इयमिति । इयं च ते तव पुरतः आदौ एव अन्या विडम्बना परिहास इत्यर्थः । का सेत्यत्राऽऽह—ऊढया परिणीतया, वहेः कर्मणि क्तः । वारण-राज-हार्यया गजेन्द्रवाह्यया । त्वया अधिष्ठितम् आरूढं वृद्धमुक्षाणं वृद्धोक्षम् । 'अचतुरेत्यादिना निपातः' । विलोक्य महाजनः साधुजनः स्मेर-मुखः स्मितमुखः भविष्यति उपहसिष्यति इति यत्, इयमिति पूर्वेण सम्बन्धः । स्मेरेति 'नमिकम्पिस्म्यजस' इत्यादिना र-प्रत्ययः ॥ ७० ॥

टि०—पुरतः—पुर+तस्, 'सर्व प्रथम' । विडम्बना=वञ्चना—धोखा, परन्तु यहाँ यह शब्द 'परिहास, तिरस्कार' के अर्थ में प्रयुक्त हुआ है । ऊढया—√वह 'ले जाना'+क्त+टाप्, तृतीया एक० । यहाँ पर क्तान्त का प्रयोग विवाह के अर्थ में हुआ है । वारण-राज-हार्यया—वारणानां राजा इति वारणराजः (तत्पु०) तेन हर्तुं योग्या, 'ऐरावत पर चढ़ने के योग्य', तया । पार्वती की पदवी के लिए यह आवश्यक था कि वह विवाह के उपरान्त पति-गृह जाते समय गजराज पर चढ़कर जाय । परन्तु हाथी के बदले बूढ़े बैल पर बैठी वह अपने आपको लोगों से उनकी हंसी-ठट्ठे का कारण बनायेगी । वृद्धोक्षम्—वृद्धश्चासौ उक्षेति वृद्धोक्षः (कर्म०), तम्; कर्मधारय समास के अन्त में उक्षन् शब्द उक्ष में बदल जाता है । (जातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः पा० ५. ४. ७७) । इससे वर के बुढ़ापे का भी बोध होता है । अधिष्ठितम्—अधि+√स्था+क्त; अधि उपसर्ग के साथ √स्था द्वितीया विभक्ति ग्रहण करती है । (अधि-शीङ्स्थासां कर्म पा० १.४.४६) । महाजनः—महांश्चासौ जनः (कर्म०),

बड़ा आदमी; मल्लिनाथ के अनुसार इसका अर्थ है 'प्रतिष्ठित व्यक्ति'। देखो, **न लङ्घयामास महाजनानां शिरांसि नैवोन्नतिमाजगाम, शिशु० ३. २८.**

स्मेर-मुखः—स्मेरं मुखं यस्य (बहु०) सः, 'मुस्कराते मुँहवाला'।

हिन्दी—और यह सर्व-प्रथम एक और हँसी होगी कि विवाह हो जाने के अनन्तर गज-राज पर चढ़ने के योग्य तुम्हें (शिव के) वृद्ध बैल पर चढ़े देखकर सज्जन मुसकरायँगे। [७०]

द्वयं गतं सम्प्रति शोचनीयतां
समागम-प्रार्थनया पिनाकिनः।
कला च सा कान्तिमती कलावत-
स्त्वमस्य लोकस्य च नेत्र-कौमुदी ॥ ७१ ॥

अन्वयः—पिनाकिनः समागम-प्रार्थनया सम्प्रति द्वयं शोचनीयतां गतम्, सा कान्तिमती कलावतः कला च अस्य लोकस्य नेत्र-कौमुदी त्वं च।

वाच्यपरि०....द्वयेन शोचनीयता गता, तया कान्तिमत्या....कलया नेत्र-कौमुद्या त्वया....।

श०—**कपालिन्**—कपालधारी शिव। **समागम**—भेंट। **कलावान्**—चन्द्रमा। **कौमुदी**—चाँदनी। **शोचनीयता**—शोचनीय दशा।

मल्लि०—**द्वयमिति**। **पिनाकिनः** ईश्वरस्य **समागम-प्रार्थनया** प्राप्तिकामनया, क्रियमाणया इति शेषः। **सम्प्रति द्वयं शोचनीयतां** शोच्यत्वं **गतम्**। किं तदाह—**सा** प्रागेव हरिशिरोगता। अत्र सेति प्रसिद्धार्थत्वात् न यच्छब्दापेक्षा। तदुक्तं काव्यप्रकाशे—"प्रकान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदुपादानं नापेक्षते" इति। **कान्तिमती** नित्ययोगे मतुप्। **कलावतः** चन्द्रस्य **कला** षोडशो भागश्च। **अस्य लोकस्य नेत्र-कौमुदी** नेत्रानन्दिनीत्यर्थः। **त्वं च**। कान्तिमतीत्वनेत्रकौमुदीत्वविशेषणयोरुभयत्रापि अन्वयः। प्रागेकैव शोच्या, सम्प्रति तु त्वमप्यपरेति द्वयं शोच्यमिति पिण्डितार्थः। शोच्यत्वञ्च निकृष्टाश्रयणादिति भावः ॥ ७१ ॥

टि०—**कपालिनः**—कपालम् अस्यास्तीति कपाली (कपाल+इनि), तस्य, 'कपालधारी शिव के'। इससे शिव के विचित्र स्वभाव का बोध होता है। यह पाठ 'पिनाकिनः' से अच्छा है। देखो,

'द्वयं गतमित्यादौ पिनाकादिपदवैलक्षण्येण किमिति कपाल्यादिपदानां काव्यानुगुणत्वम् ।' मम्मट ।

समागम-प्रार्थनया—समागमस्य प्रार्थना तया (तत्पु०), '(शिव के साथ) भेंट करने की तुम्हारी इच्छा से' । कलावतः—प्रशस्ताः कलाः सन्ति अस्येति कलावान्', तस्य, (कला + मतुप्), 'श्रेष्ठ कलाओं से युक्त चन्द्रमा का' । कला को प्रशंसा के अर्थ में मतुप् प्रत्यय जोड़ा गया है । देखो 'भूमिनिन्दाप्रशंसायां नित्ययोगेऽतिशायने' । सा—वह जो प्रसिद्ध है । तद् का यहाँ प्रयोग परिचय के अर्थ में हुआ है, अतः इससे पहले यद् की आवश्यकता नहीं । देखो,

'प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदुपादानं नापेक्षते ।' मम्मट

नेत्र-कौमुदी....नेत्रयोः कौमुदी (तत्पु०), आँखों के लिए चाँदनी', अर्थात् आँखों के लिए ऐसे सुखदायी जैसे चन्द्र-कला होती है । देखो,

त्वं कौमुदी नयनयोरमृतं त्वमङ्गे' उत्तर० ३. २६.

काव्यप्रकाश तथा साहित्यदर्पण में यह पद्य 'अक्रमत्व' का उदाहरण दिया गया है । यहाँ च को त्वं के बाद में होना चाहिए था न कि लोकस्य के बाद में । देखो, 'अत्र त्वमित्यनन्तरमेव चकारो युक्तः' साहित्यदर्पण ।

हिन्दी—महादेव के साथ समागम की इच्छा से अब दो पदार्थ शोचनीय अवस्था को प्राप्त हुए हैं—प्रसिद्ध चन्द्रमा की वह दीप्तिमती कला और इस लोक की नेत्र-ज्योत्स्ना तुम । [७१]

वपुर्विरूपाक्षमलक्ष्य जन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बाल-मृगाक्षि ! मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ॥ ७२ ॥

अन्वयः—वपुः विरूपाक्षम्, अलक्ष्य-जन्मता, वसु दिगम्बरत्वेन निवेदितम्, (हे) बाल-मृगाक्षि ! वरेषु यत् मृग्यते तत् त्रिलोचने व्यस्तम् अपि अस्ति किम् ?

वाच्यपरि०—...वपुषा विरूपाक्षेण (भूयते), अलक्ष्य-जन्मतया (भूयते)....दिगम्बरत्वं निवेदितवत्,....मृगयन्ते, तेन....व्यस्तेन...भूयते....।

श०—विरूपाक्ष—विकृत (कुरूप) नेत्रधारी । अलक्ष्य-जन्मता—अज्ञात जन्म का होना । दिगम्बरत्व—दिशायों का ही वस्त्र होना, सर्वथा नंगा होना । वसु—धन । व्यस्त—एक-एक करके, अलग-अलग ।

मल्लि०—"कन्या वरयते रूपं माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥"

इति लोकानामाभाषणम् । तत्र किञ्चिदपि नास्तीत्याह—वपुरिति । वपुः शरीरम् । तावदस्य विरूपाणि विकृतरूपाणि अक्षीणि नेत्राणि यस्य तत् विरूपाक्षम् । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् इति षच्प्रत्ययः । वैरूप्यञ्च त्रिनेत्रत्वादिति क्षीरस्वामी । अतो न सौन्दर्यवार्ताऽपीत्यर्थः । (अलक्ष्य-जन्मता) अलक्ष्यम् अज्ञातं जन्म यस्य तस्य भावस्तत्ता, कुलमपि न ज्ञायते इत्यर्थः । "अलक्षिता जनिः" इति पाठे जनिः उत्पत्तिः अलक्षिता न ज्ञाता । "जनिरुत्पत्तिरुद्भवः" इत्यमरः । वसु वित्तम् । दिगम्बरत्वेन एव निवेदितम्, नास्तीति ज्ञापितम् इत्यर्थः । यदि वित्तं भवति तदा कथं दिगम्बरो भवति, अतो ज्ञेयं निर्धनोऽयमिति । किंबहुना, हे बाल-मृगाक्षि पार्वति ! वरेषु वोढृषु, "वरो जामातृवोढारौ" इति विश्वः । यत् रूपवित्तादिकं मृग्यते कन्यातद्बन्धुभिरन्विष्यते तत् त्रिलोचने त्र्यम्बके व्यस्तम् एकम् अपि समस्तं मा भूदिति भावः । अस्ति किम् । नास्त्येवेत्यर्थः ॥ ७२ ॥

टि०—विरूपाक्षम्—विरूपाणि अक्षीणि यस्मिन् (बहु०), तत्, 'जिसके कुरूप नेत्र हैं' ; अथवा विरूपमक्षि यस्मिन्, 'विकृत नेत्र से युक्त' । पिछला विग्रह अच्छा है क्योंकि इससे शिव के केवल एक ही विकृत नेत्र की ओर संकेत है जो प्रायः बन्द रहता है, परन्तु प्रलय-काल पर खुलकर भयंकर संहार करता है । इस विशेषण द्वारा शिव के शरीर की कुरूपता का बोध होता है । शारीरिक शोभा के कारण ही कन्या वर को वरती है (कन्या वरयते रूपम्) । अलक्ष्य-जन्मता—न लक्ष्यं (लक्ष+यत्) अलक्ष्यम् (नञ् तत्पु०), अलक्ष्यं जन्म यस्य स अलक्ष्यजन्मा, तस्य भावः अलक्ष्यजन्मता, 'अज्ञात जन्म का होना' । कन्या-पक्ष के लोग वर की कुलीनता के लिए ध्यान रखते हैं । वर की कुलीनता होने पर वे प्रसन्न

होते हैं (बान्धवाः कुलमिच्छन्ति)। किन्तु शिव के माता-पिता के विषय में कुछ भी ज्ञात नहीं। 'अलक्ष्यजन्मता' की रचना दूषित है। (अविमृष्ट-विधेयांशो दोषः)। यहाँ जन्म कर्त्ता है, (अर्थात् जन्मता अनुवाद्य है) और जो विधेय है वह जन्म का न जानना है (अर्थात् अलक्ष्य विधेय है)। किन्तु यह विधेय, क्योंकि यह अलक्ष्यजन्मता समास का भाग है, अतः अप्रधान बन गया है। दिगम्बरत्वेन—दिश एव अम्बराणि यस्य (बहु०) सः दिगम्बरस्तस्य भावः दिगम्बरत्वम्, तेन, 'नंगेपन के कारण से'। शिव को केवल गज-चर्म पहने बताया गया है। इससे उनकी निर्धनता विदित होती है और इसी कारण वे पार्वती के लिए उपयुक्त वर सिद्ध नहीं होते। बाल-मृगाक्षि—बालश्चासौ मृग इति बालमृगः (कर्म०) तस्य अक्षिणी (तत्पु०), तादृशी अक्षिणी यस्याः (बहु०) सा तत्सम्बुद्धौ। यहाँ दूसरे अक्ष शब्द का लोप हो गया है जैसा कि 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' का आदेश है। ऐसे समासों में शब्द यदि सप्तमी विभक्ति में संज्ञा अथवा तरतम्य सूचक संज्ञा के बाद हो तो उसका लोप हो जाता है। वामन तथ भट्टोजि आदि वैयाकरणों ने इस वार्त्तिक को निरर्थक समझकर छोड़ दिया है। मृग्यते—कर्मवाच्य लट् प्र० पु० एक० 'ढूँढ़ा जाता है'। त्रिलोचने—त्रीणि लोचनानि यस्य (बहु०) सः त्रिलोचनः, तस्मिन्। व्यस्तम्—वि+√अस् 'फेंकना' +क्त। सुन्दरता, कुलीनता तथा धनाढ्यता यह तीनों ही आदर्श वर के लिए आवश्यक योग्यताएँ हैं। देखो,

कन्या वरयते रूपं माता वित्तं पिता कुलम्।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः॥

हिन्दी—उनका शरीर कुरूप नेत्रों से युक्त है, जन्म अज्ञात है, धन नग्नता से प्रत्यक्ष है। हे बाल-मृगनयने ! जो (रूप-धन आदि) (वर में) ढूँढ़ा जाता है, वह क्या शिव में एक भी है ? [७२]

निवर्तयास्मादसदीप्सितान्मनः
क्व तद्विधस्त्वं क्व च पुण्य-लक्षणा।
अपेक्ष्यते साधु-जनेन वैदिकी
श्मशान-शूलस्य न यूप-सत्क्रिया॥ ७३॥

अन्वयः—अस्मात् असदीप्सितात् मनः निवर्तय, तद्विधः क्व ? पुण्य-लक्षणा त्वं च क्व ? साधु-जनेन श्मशान-शूलस्य वैदिकी यूप-सत्क्रिया न अपेक्ष्यते ।

वाच्यपरि०—....निवर्त्यताम् । तद्विधेन....(भूयते), पुण्य-लक्षणया त्वया....(भूयते); साधु-जनः....वैदिकी यूप-सत्क्रियां न अपेक्षते ।

श०—**असत्**—अनिष्ट । **श्मशान-शूल**—श्मशान-भूमि पर गाड़ी गई सूली । **वैदिकी**—वेदोक्त । **यूप-सत्क्रिया**—यज्ञ में बलि के लिए पशु के बाँधने के खूँटे का संस्कार ।

मल्लि०—निवर्तयेति । **अस्मात् असदीप्सितात्** अनिष्टमनोरथात् । **मनः निवर्तय** निवारय (**तद्विधः**) सा पूर्वोक्ता विधा प्रकारो यस्य तथोक्तः अमङ्गलशील इत्यर्थः, **क्व** ? महदन्तरमित्यर्थः । **पुण्यलक्षणा** प्रशस्त-भाग्यचिह्ना **त्वं च क्व** ? अतो न तव अयमर्ह इत्यर्थः । तथाहि—**साधु-जनेन** "साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्" इति विश्वः । **श्मशान-शूलस्य** श्मशानभूमिनिखातस्य मध्यशङ्कोः । **वैदिकी** वेदोक्ता यूपो नाम पशुबन्धनसाधनभूतः संस्कृतदारुविशेषः, तस्य सत्क्रिया प्रोक्षणा-भ्युक्षणादिसंस्कारः । **यूप-सत्क्रिया न अपेक्ष्यते** नेष्यते । यथा श्मशान-शूले यूपसत्क्रिया न क्रियते तथा त्वमपि तस्मै न घटसे इति तात्पर्यार्थः ॥ ७३ ॥

टि०—**असदीप्सितात्**—न सत् असत् (नञ् तत्पु०), असच्च तदीप्सितञ्चेति असदीप्सितम् (कर्म०), तस्मात्, 'अनिष्ट मनोरथ से' । जिससे किसी को रोका जाता है उसके लिए पञ्चमी विभक्ति का प्रयोग होता है (वारणार्थानामीप्सितः पा० १. ४. २७) । **क्व तद्विधः आदि** । दो क्व द्वारा दोनों में भारी अन्तर प्रकट होता है । देखो पृष्ठ ३० । कवि ने यहाँ यज्ञ के यूप तथा श्मशान-भूमि के डण्डे की तुलना करके दोनों में भारी अन्तर दिखाया है । **साधु-जनेन**—साधुश्चासौ जन इति स साधुजनः (कर्म०) तेन, 'सज्जन द्वारा' । **वैदिकी**—वेद+ठञ् (=इक)+ ङीप्, 'वेदोक्त' । **यूप-सत्क्रिया**—यूपस्य सत्क्रिया (तत्पु०), यज्ञीय यूप (पशु बाँधने का खूँटा) का संस्कार । इस पद्य में शिव की श्मशान-

भूमि के फाँसी के खूँटे से तुलना की गई है और इसलिए पार्वती को उनसे मन हटाकर किसी और पर लगाने को कहा गया है। देखो,

तत्परित्यज्य गिरिशमुपेन्द्रं वा शचीपतिम्।
वरय त्वं विशालाक्षि! वरयोग्यौ तु तौ तव॥ शिवपुराण

श्मशान-शूलस्य—श्मशान भूमि पर फाँसी के लिए गाड़ी गई सूली का।

हिन्दी—इस अनिष्ट मनोरथ से मन हटालो, कहाँ उस प्रकार का वह (अमङ्गलकारी शिव) और कहाँ शुभ-लक्षणों से युक्त तुम! सज्जन लोग श्मशान-भूमि के दण्ड की यज्ञीय-दण्ड के वेदोक्त संस्कार की इच्छा नहीं करते। [७३]

इति द्विजातौ प्रतिकूल-वादिनि
प्रवेपमानाधर - लक्ष्य - कोपया।
विकुञ्चित - भ्रूलतमाहिते तया
विलोचने तिर्यगुपान्त-लोहिते॥ ७४॥

अन्वयः—द्विजातौ इति प्रतिकूल-वादिनि (सति) प्रवेपमानाधर-लक्ष्य-कोपया तया उपान्त-लोहिते विलोचने विकुञ्चित-भ्रूलतं तिर्यक् आहिते।

वाच्यपरि०—....प्रवेपमानाधर-लक्ष्य-कोपा सा...आहितवती।

श०—प्रतिकूल—विपरीत। प्रवेपमान—काँप रहा, चञ्चल। लक्ष्य—प्रकट। विकुञ्चित—टेढ़ा। भ्रूलता—भ्रू रूपी लता। उपान्त—कोआ। लोहित—लाल। आहित—स्थापित की, डाली।

मल्लि०—इतीति। इति एवं प्रकारेण द्विजातौ द्विजे प्रतिकूल-वादिनि सति। (प्रवेपमानाधर-लक्ष्य-कोपया) प्रवेपमाणेन चञ्चलेन अधरेण अधरोष्ठेन लक्ष्यः अनुमेयः कोपः क्रोधः यस्याः तथोक्तया तया। पार्वत्या उपान्त-लोहिते प्रान्तरक्ते विलोचने (विकुञ्चित-भ्रूलतं) विकुञ्चिते कुटिलिते भ्रूलते यस्मिन् तत् तथा सभ्रूभङ्गमित्यर्थः। तिर्यक साचि आहिते निहिते अनादरात् तिर्यगैक्ष्यतेत्यर्थः॥ ७४॥

टि०—द्विजातौ—द्वे जाती यस्य (बहु०) सः द्विजातिः, तस्मिन्,

देखो पृष्ठ ८४। प्रतिकूल-वादिनि—प्रतिकूलं वदतीति प्रतिकूलवादिन् तस्मिन्, '(उसकी इच्छा के) विपरीत बोलने पर'। प्रवेपमानाधर-लक्ष्य-कोपया—प्रवेपमानेन अधरेण लक्ष्यः कोपो यस्याः (बहु०), 'वह जिसका क्रोध काँप रहे निचले होंठ से प्रकट हो रहा है', तया। उपान्त-लोहिते—उपान्तयोः लोहिते (तत्पु०), 'कोओं के लाल हो जाने पर'। विकुञ्चित-भ्रू-लतम्—विकुञ्चिते भ्रूलते यस्मिन् (बहु०) तद् विकुञ्चित-भ्रूलतम्, वह ढंग जिससे लता रूपी भौंहें टेढ़ी हो रही थीं। तिर्यगाहिते—'तिरछी (नज़र) डाली'। निचले होंठ का काँपना, कोओं का लाल होना, तथा भौंहों का टेढ़ा हो जाना, यह सब उस क्रोध के सूचक हैं जो पार्वती की अभिलाषा के विरुद्ध ब्रह्मचारी के बोलने पर उसे उत्पन्न हुआ है।

हिन्दी—इस प्रकार ब्राह्मण के विपरीत भाषण करने पर पार्वती ने, जिसका क्रोध काँप रहे अधरोष्ठ से प्रकट हो रहा था, भौंवें चढ़ाकर, कोओं को लाल किये, तिरछी नज़र डाली। [७४]

उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम्।
अलोक-सामान्यमचिन्त्य-हेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥ ७५ ॥*

अन्वयः—एनम् उवाच च परमार्थतः हरं न वेत्सि नूनं, यतः माम् एवम् आत्थ, मन्दाः अलोक-सामान्यम् अचिन्त्य-हेतुकं महात्मनां चरितं द्विषन्ति।

वाच्यपरि०—एषः उच्ये च, ...हरः...विद्यते...., ...अहम् ....ऊचे, मन्दैः...द्विष्यते।

श०—परमार्थतः—वस्तुतः। अचिन्त्य—जो जाना न जा सके। हेतु—कारण। द्विषन्ति—द्वेष करते हैं।

मल्लि०—उवाचेति। अथ एनं ब्रह्मचारिणम् उवाच च। किमिति? परमार्थतः तत्त्वतः हरं न वेत्सि न जानासि नूनम्। कुतः? यतः माम् एवम्। उक्तया रीत्या आत्थ ब्रवीषि। 'ब्रुवः पञ्चानामादितः' इति रूपसिद्धिः। अज्ञानात् एवायं शिवद्वेषस्तव इत्याशयेनाऽऽह—मन्दाः मूढाः। "मूढाल्पापटुनिर्भाग्या मन्दाः" इत्यमरः। लोकसामान्यम् इतरजन-

साधारणं न भवतीति अलोक-सामान्यम् । अचिन्त्य-हेतुकं दुर्बोधम् महात्मनां चरितं द्विषन्ति हेत्वपरिज्ञानाद् दूषयन्ति । विद्वांसस्तु कोऽप्यत्र हेतुरस्तीति बहु मन्यन्ते इत्यर्थः ॥ ७५ ॥

टि०—परमार्थतः—वस्तुतः; परमार्थ के आगे तसिल् प्रत्यय पञ्चमी विभक्ति के अर्थ में जोड़ा गया है। (पञ्चम्यास्तसिल् पा० ५. ३. ७)। 'परमार्थतः' शब्द का सम्बन्ध 'हरम्' और 'न वेत्सि' दोनों के साथ लिया जा सकता है। 'हरम्' के साथ लेने से उसका अर्थ होगा 'जो वास्तव में शिव था'। ब्रह्मचारी के वेष में शिव ही था जो अपने विषय में पार्वती की मनोभावना जानना चाहता था। 'न वेत्सि' के साथ लेने से इसका अर्थ होगा 'तुम वास्तव में नहीं जानते हो'। 'परमार्थतो न वेत्सि' वाक्य की रचना इस प्रकार होगी:—(१) परमार्थतो हरम् एनम् उवाच च, नूनं त्वं न वेत्सि, यतः माम् एवम् आत्थ, अथवा (२) एनम् उवाच च, हरं परमार्थतः न वेत्सि, यतः माम् एवम् आत्थ। अलोक-सामान्यम्—लोकेषु सामान्यं लोकसामान्यम्, नास्ति लोकसामान्यं यस्य तत् (बहु०), जो जन सामान्य से भिन्न है, अर्थात् असाधारण। अचिन्त्य-हेतुकम्—न चिन्त्यम् अचिन्त्यम्, अचिन्त्यो हेतुर्यस्य तत् (बहु०), वह जिसका कारण समझा नहीं जा सकता। यह विशेषण उन कारणों से परिपूर्ण है जिनके लिए शिव का जीवन-चरित समझ में नहीं आता। यह ब्रह्मचारी की उस उक्ति का उत्तर प्रतीत होता है कि वह शिव को भली-भाँति जानता है। देखो, विदितो महेश्वरः कुमार० ५. ६५।

हिन्दी—और पार्वती उसे बोली—अवश्य तुम वास्तविक रूप से महादेव को नहीं जानते, इसीलिए तुम मुझे ऐसा कहते हो। मूढ़ लोग महात्माओं के असाधारण और दुर्बोध कारण-युक्त चरित्र से (अज्ञान-वश) द्वेष किया करते हैं। [७५]

विपत्प्रतीकार - परेण मङ्गलं
निषेव्यते भूति - समुत्सुकेन वा।
जगच्छरण्यस्य निराशिषः सतः
किमेभिराशोपहतात्म-वृत्तिभिः ॥ ७६ ॥

अन्वयः—विपत्प्रतीकार-परेण भूति-समुत्सुकेन वा मङ्गलं निषेव्यते जगच्छरण्यस्य निराशिषः सतः आशोपहतात्म-वृत्तिभिः एभिः किम् ?

वाच्यपरि०—....विपत्प्रतीकार-परः भूति-समुत्सुकः........निषेवते...., केन (भूयते)।

श०—प्रतीकार—उपाय। समुत्सुक—इच्छुक। निषेव्यते—सेवन किया जाता है। शरण्य—आश्रय-दाता। निराशिष्—निरभिलाशी, निरीह। आशा—तृष्णा। उपहत—दूषित, नष्ट। वृत्ति—प्रवृति।

मल्लि०—सम्प्रति अमङ्गलाभ्यासरतिम् इत्याद्युक्तं दूषणजातं विपदित्यादिभिः षड्भिः श्लोकैः परिहर्तुमारभते—विपदिति। विपत्प्रतीकार-परेण अनर्थपरिहारार्थिना इत्यर्थः। "**उपसर्गस्य घञ्यमनुष्ये बहुलम्**" **इति दीर्घः**। भूति-समुत्सुकेन ऐश्वर्यकामेन वा मङ्गलम् गन्धमाल्यादिकं निषेव्यते। शरणे साधुः शरण्यः। '**तत्र साधुः इति यत्प्रत्ययः**'। "शरणं गृहरक्षित्रोः" इत्यमरः। जगतः शरण्यः तस्य जगच्छरण्यस्य निराशिषः निरभिलाषस्य सतः शिवस्य। "आशीरुरगदंष्ट्रायां विप्रवाक्याभिलाषयोः" इति शाश्वतः। (आशोपहतात्म-वृत्तिभिः) आशया तृष्णया उपहता दूषिता आत्मवृत्तिः येषां तैः। एभिः मङ्गलैः किं ? वृथा इत्यर्थः। पूर्वं मङ्गलमित्येकवचनस्य जात्यभिप्रायत्वात् एभिरिति बहुवचनेन परामर्शो न विरुध्यते। इष्टावाप्त्यनिष्टपरिहारार्थिनो हि मङ्गलाचारनिर्बन्धः तदुभयासंस्पृष्टस्य तु यथाकथञ्चित् आस्ताम्, को दोष इत्यर्थः। एतेन "अमङ्गलाभ्यासरतिम्" इत्युक्तं प्रत्युक्तम् ॥ ७६ ॥

टि०—विपत्प्रतीकार-परेण—विपदां प्रतीकारः परः यस्य (बहु०), विपत्प्रतीकारपरः, 'दुःखनिवारण में तत्पर', तेन। प्रतीकार—प्रति की इ को विकल्प से दीर्घ कर दिया जाता है (उपसर्गस्य घञ्यमनुष्ये बहुलम् पा० ६. ३. १२२)। इस प्रकार प्रतिकार रूप भी बनेगा। भूति-समुत्सुकेन—भूतौ समुत्सुकः, 'ऐश्वर्य का इच्छुक', तेन। मङ्गलं निषेव्यते—मङ्गलमय पदार्थों का सेवन किया जाता है। जगच्छरण्यस्य—जगतां शरण्यः, तस्य (तत्पु०), जगत् की रक्षा के समर्थ। शरण्यः—शरणे साधुः, शरण+यत् (तत्र साधु, पा० ४. ४. ९८)। निराशिषः—निर्गता आशीः

यस्मात् स निराशीः, 'निरभिज्ञाषी', तस्य। आशोपहतात्म-वृत्तिभिः--आशया उपहता आत्मनो वृत्तिः यैः तानि आशोपहतात्मवृत्तीनि (बहु०), तैः, 'तृष्णा द्वारा आत्मा की प्रवृत्तियों को दूषित करनेवाले (मङ्गलकारी पदार्थों से)'। यह 'एभिः' का विशेषण है जो 'मङ्गलैः' की ओर संकेत करता है।

पार्वती के कहने का तात्पर्य यह है कि मङ्गलकारी पदार्थों का आश्रय तो वे लोग लेते हैं जो दुःख-निवारण की इच्छा करते हैं और ऐश्वर्य की आकांक्षा करते हैं किन्तु शिव को, जो निरभिलाषी है, जगत का आश्रय-दाता है, इन मङ्गलकारी पदार्थों से क्या प्रयोजन ?

हिन्दी—अपनी विपत्ति का प्रतीकार (उपाय) करने में दत्तचित्त वा ऐश्वर्य की इच्छा करनेवाले पुरुष से शुभ पदार्थों का सेवन किया जाता है, परन्तु जगत् के आश्रयदाता और निरभिलाषी होने पर शिव का, तृष्णा द्वारा अन्तःकरण की प्रवृत्तियों को दूषित करनेवाले, इन (मङ्गलमय पदार्थों से) क्या प्रयोजन ? [७६]

अकिञ्चनः सन् प्रभवः स सम्पदां
त्रिलोक-नाथः पितृ-सद्म-गोचरः।
स भीम-रूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्य-विदः पिनाकिनः॥ ७७॥

अन्वयः—सः अकिञ्चनः सन् सम्पदाम् प्रभवः पितृ-सद्म-गोचरः सन् त्रिलोक-नाथः भीम-रूपः (सन्) शिव इति उदीर्यते पिनाकिनः याथार्थ्य-विदः न सन्ति।

वाच्यपरि०—तम् अकिञ्चनं सन्तं....पितृ-सद्म-गोचरं ....त्रिलोक-नाथं भीम-रूपम्.... उदीरयन्ति ....याथार्थ्य-विद्भिः....भूयते।

श०—अकिञ्चन—निर्धन, दरिद्र। प्रभव—कारण, स्रोत। पितृ-सद्म—श्मशान। याथार्थ्य-विदः...तत्त्व-वेत्ता।

मल्लि०—अकिञ्चन इति। सः हरः न विद्यते किञ्चन द्रव्यं यस्य सः अकिञ्चनः दरिद्रः सन् सम्पदाम्, प्रभवति अस्मादिति प्रभवः कारणम्। पितृ-सद्म-गोचरः श्मशानाश्रयः सन् (त्रिलोक-नाथः) त्रयाणां लोकानां नाथः "तद्धितार्थ—" इत्यादिनोत्तरपदसमासः। स भीम-रूपः भयङ्करा-

कारः सन् शिवः सौम्यरूपः इति उदीर्यते उच्यते। अतः पिनाकिनः हरस्य (याथार्थ्य-विदः) यथाभूतोऽर्थः यथार्थः तस्य भावः याथार्थ्यं तत्त्वं तस्य विदः न सन्ति। लोकोत्तरमहिम्नो निर्लेपस्य यथाकथञ्चित् अवस्थानं न दोषायेति भावः। एतेन "अवस्तुनिर्वन्धपरे" इति श्लोकोक्तं परिहृतं वेदितव्यम् ॥ ७७ ॥

टि०—अकिञ्चनः—नास्ति किञ्चन यस्य सः, 'जिसके पास कुछ भी नहीं है'। यह मयूरव्यंसकादि का तत्पुरुष समास है न कि बहुव्रीहि। (मयूरव्यंसकादयश्च पा० २. १. ७२)। सम्पदां प्रभवः—ऐश्वर्य का स्रोत। चाहे शिव निर्धन है तब भी वह ऐश्वर्य का स्रोत है। त्रिलोकनाथः—त्र्यवयवो लोकस्त्रिलोकस्तस्य नाथः (मध्यमपदलोपि तत्पु०)। मल्लिनाथ ने इस समास का विग्रह इस प्रकार किया है:—"त्रयाणां लोकानां नाथः। तद्धितार्थ–इत्यादि नोत्तरपदसमासः" किन्तु यह विग्रह ठीक नहीं, क्योंकि त्रिपद तत्पुरुष का विधान तभी होता है जब उत्तर भाग द्वारा 'परिमाण' का बोध हो। अतः इस प्रकार के समास भाष्यकार के मतानुसार शाकपार्थिवादि वर्ग के अन्तर्गत लिये जाने चाहिएँ। पितृ-सद्म-गोचरः—पितॄणां सद्म गोचरः यस्यः यस्य (बहु०) सः, जो पितरों के निवास-स्थान पर विचरता है, अर्थात् जो श्मशान-भूमि पर घूमता है। भीम-रूपः–भीमं रूपं यस्य (बहु०) सः, जो डरावनी सूरतवाला है। शिवः—मङ्गलकारी रूपवाला। याथार्थ्य-विदः—यथाभूतोऽर्थो यथार्थः (प्रादि तत्पु०), यथार्थस्य भावः याथार्थ्यम्, तस्य विदः, 'तत्त्ववेत्ता'।

पार्वती के कहने का तात्पर्य यह है कि शिव में परस्पर विरोधी गुण भरे हैं, वह निर्धन होते हुए भी दाता है, त्रिलोकी का नाथ होते हुए भी श्मशान-भूमि में रहनेवाला है, भयंकर रूपधारी होते हुए भी मङ्गल रूप वाला है। इन परस्पर विरोधी गुणों से युक्त होने के कारण शिव को यथार्थ रूप से जानना कठिन है।

हिन्दी—वह महादेव दरिद्र होकर भी धन-ऐश्वर्य का उत्पत्ति-स्थान है, पितृ-भूमि (श्मशान) में रहता हुआ भी त्रिभुवन-पति है, वह भयानक आकृतिवाला (लोगों से) शिव (कल्याणकारी) कहा

जाता है, त्रिशूल-धारी (शिव) की वास्तविकता को जाननेवाले पुरुष नहीं हैं। [७७]

विभूषणोद्भासि पिनद्ध-भोग वा
गजाजिनालम्बि-दुकूल-धारि वा।
कपालि वा स्यादथवेन्दु शेखरं
न विश्व - मूर्तेरवधार्यते वपुः ॥ ७८ ॥

अन्वयः—विश्व-मूर्तेः वपुः विभूषणोद्भासि स्यात् पिनद्ध-भोगि वा (स्यात्) गजाजिनालम्बि (स्यात्) दुकूल-धारि (स्यात्) कपालि व स्याद् अथवा इन्दु-शेखरं (स्यात्) न अवधार्यते।

वाच्यपरि०—....वपुषा विभूषणोद्भासिना...., पिनद्ध-भोगिना...., गजाजिनालम्बिना, दुकूल-धारिणा...., कपालिना...., इन्दु-शेखरेण....। (जनाः)... अवधारयन्ति।

श०—विभूषण—आभूषण। उद्भासिन्—देदीप्यमान। पिनद्ध—बाँधा गया। भोगिन्—साँप। कपालि—जो खप्पर धारण किये है।

मल्लि०—देवस्य लौकिकमलौकिकञ्च प्रसाधनं नास्तीत्याशयेनाऽऽह—विभूषणोद्भासीति। विश्वं मूर्तिः यस्येति विश्वमूर्तेः अष्टमूर्तेः शिवस्य। वपुः शरीरम्। भूषणैः उद्भासत इति विभूषणोद्भासि स्यात्। पिनद्ध-भोगि आमुक्तभुजङ्गमं वा स्यात्। पिनद्धेति नह्यतेरपिपूर्वात् कर्मणि क्तः। "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इति अकारलोपः। गजाजिना-लम्बि स्यात्, अथवा दुकूलधारि स्यात्। कपालमस्यास्तीति कपालि ब्रह्मशिरः-कपालशेखरं वा स्यात्, इन्दु-शेखरं वा स्यात्। न अवधार्यते न निर्धार्यते सर्वं सम्भवतीत्यर्थः एतेन "त्वमेव तावत्" इति श्लोकोक्तं प्रत्युक्तमिति ज्ञेयम्॥ ७८॥

टि०—विभूषणोद्भासि—विभूषणैः उद्भासत इति तत् (तत्पु०), 'आभूषणों से देदीप्यमान (शरीर)'। पिनद्ध-भोगि—पिनद्धा भोगिनः यस्मिन् (बहु०) तत्, साँपों से लिपटा (शरीर)। यह पहले कहे विशेषण के विपरीत है। भिन्न-भिन्न तथा परस्पर विरोधी गुणों से युक्त होने के कारण शिव को विचित्र प्रकृति का कहा गया है। पिनद्ध—अपि +

√नह् 'बाँधना' + क्त। अपि के अ का विकल्प से लोप हो जाता है। ('वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः') । गजाजिनालम्बि—गजस्य अजिनम् अवलम्बते इति (तत्पु०), 'गजचर्म में लिपटा'। दुकूल-धारि—दुकूलं धारयतीति, रेशमी वस्त्र पहने। कपालिन्—कपालम् अस्मिन् अस्तीति तत्। कपाल—कपाल से ब्रह्मा की खोपड़ी की ओर संकेत है। एक बार शिव को ब्रह्मा के यह कहने पर क्रोध आ गया कि शिव मेरे मस्तक से उत्पन्न हुआ है। शिव ने क्रोध के वशीभूत होकर काल भैरव का उग्र रूप प्रकट किया, और अपने नाखूनों से ब्रह्मा का एक सिर काट डाला और उसे अपने मस्तक पर रख लिया। इन्दु-शेखरम्—इन्दुः शेखरे यस्य (बहु०) तत्, 'जिसके मस्तक पर चन्द्रमा है'। यह विशेषण 'वपुः' (नपुं०) के साथ जायेंगे। विश्व-मूर्तेः—विश्वं मूर्तिः यस्य (बहु०) स विश्वमूर्तिः, 'वह जिसका स्वरूप विश्व है', तस्य। न अवधार्यते—निश्चित नहीं किया जा सकता।

हिन्दी—विश्व-मूर्त्ति शिव के शरीर का निश्चय नहीं किया जा सकता, वह (शरीर) आभूषणों से शोभित हो या फणधारी साँप से लिपटा हो, गज-चर्म में ढँपा हो वा रेशमी वस्त्र धारण किए हो, (मस्तक पर) कपाल हो वा मस्तक पर चन्द्रमा हो (कोई नहीं ठीक जानता)। [७८]

तदङ्ग - संसर्गमवाप्य कल्पते
ध्रुवं चिता-भस्म-रजो विशुद्धये।
तथाहि नृत्याभिनय-क्रिया-च्युतं
विलिप्यते मौलिभिरम्बरौकसाम् ॥ ७९ ॥

अन्वयः—तदङ्ग-संसर्गम् अवाप्य चिता-भस्म-रजः विशुद्धये कल्पते ध्रुवम्, तथाहि नृत्याभिनय-क्रिया-च्युतम् (तत् भस्म) अम्बरौकसां मौलिभिः विलिप्यते।

वाच्यपरि०— चिता-भस्म-रजसा.... कल्पते.... । ....मौलयः विलिम्पन्ति।

श०—संसर्ग—सम्पर्क। अवाप्य—प्राप्त करके। ध्रुवम्—निश्चय

ही। अभिनय—शरीर की हाव-भाव भरी चेष्टा। च्युत—पतित, गिरी। अम्बरौकस्—स्वर्लोकवासी, देवता। मौलिभिः—सिरों द्वारा। विलिप्यते—धारण की जाती है।

मल्लि०—"अयुक्तरूपं किमतः परं वद" इति श्लोकोक्तं प्रत्याह—तदङ्गेति। (तदङ्ग-संसर्गम्) तस्य शिवस्य अङ्गं तस्य संसर्गम् अवाप्य आसाद्य (चिता-भस्म-रजः) चिताभस्मैव रजः विशुद्धये कल्पते। अलं पर्याप्नोतीत्यर्थः। अलमर्थयोगात् "नमः स्वस्तिस्वाहा" इत्यादिना चतुर्थी। ध्रुवं शोधकत्वं प्रमाणसिद्धमित्यर्थः। प्रमाणमेवाऽऽह—तथाहि प्रसिद्धमेवेत्यर्थः। (नृत्याभिनय-क्रिया-च्युतं) नृत्ये ताण्डवे यः अभिनयोऽर्थव्यञ्जकचेष्टाविशेषः स एव क्रिया तया निमित्तेन च्युतं पतितं चिताभस्मरज इति शेषः। अम्बरौकसां देवानां मौलिभिः विलिप्यते ध्रियते। अशुद्धं चेत् कथमिन्द्रादिभिर्ध्रियेतेत्यर्थापत्तिः अनुमानं वा प्रमाणमित्यर्थः॥ ७९॥

टि०—चिता-भस्म-रजः—चितायाः भस्मनः रजः (तत्पु०), चिता की भस्म की धूलि। तदङ्ग-संसर्गम्—तस्य अङ्गानां संसर्गः तदङ्गसंसर्गः तम् (तत्पु०)। अवाप्यते—अव+√आप्+क्त्वा (=ल्यप्), प्राप्त करके। ध्रुवम्—अव्यय, निश्चय ही। विशुद्धये कल्पते—संशुद्धि के लिए पर्याप्त है। यहाँ विधेय 'कल्पते' अलम् 'पर्याप्त' का सूचक है, अतः यहाँ चतुर्थी विभक्ति का प्रयोग हुआ है। (नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च पा० २. ३. १६)। कुछ लोगों के मतानुसार यहाँ चतुर्थी का प्रयोग इस लिए हुआ है कि जिस अभिप्राय के लिए कोई कार्य किया जाता है वह सूचित हो, अथवा वह परिणाम सूचित हो जिसे पाने के लिए कोई वस्तु सहायक सिद्ध होती है। (क्लृपि संपद्यमाने च वा०) नृत्याभिनय-क्रिया-च्युतम्—नृत्ये अभिनयः एव क्रिया तथा च्युतम् (तत्पु०), ताण्डव नृत्य के अभिनय के समय गिरी (भस्म)। अम्बरौकसाम्—अम्बरम् ओकः येषां (बहु०) तेषाम्, उनका जिनका निवास-स्थान स्वर्ग है।

ब्रह्मचारी द्वारा पद्य ६९ में कहे वचन का यह उत्तर है। इस पद्य में कहा गया है कि शिव के शरीर पर लगी भस्म पार्वती की छाती से लग जायगी। पार्वती ने उत्तर में कहा है कि भस्म तो शिव के शरीर के साथ

लगने से पवित्र हो गई है और इसी लिए वह जब ताण्डव नृत्य का अभिनय करते हैं और भस्म नीचे गिरती है तो वह भस्म स्वर्लोकवासी देवताओं द्वारा अपने सिरों पर धारण की जाती है।

हिन्दी—चिता-भस्म की धूलि भी उसके शरीर-स्पर्श को पाकर सचमुच शुद्धि के समर्थ हो जाती है। इसीलिए (यह प्रसिद्ध है कि) ताण्डव-नृत्य के समय अभिनय-क्रिया से गिरी हुई (वह भस्म) स्वर्लोक-वासी देवताओं के सिरों पर धारण की जाती है। [७६]

असम्पदस्तस्य वृषेण गच्छतः
प्रभिन्न-दिग्वारण-वाहनो वृषा।
करोति पादावुपगम्य मौलिना
विनिद्र-मन्दार-रजोऽरुणाङ्गुली ॥ ८० ॥

अन्वयः—प्रभिन्न-दिग्वारण-वाहनः वृषा असम्पदः वृषेण गच्छतः तस्य पादौ मौलिना उपगम्य विनिद्र-मन्दार-रजोऽरुणाङ्गुली करोति।

वाच्यपरि—प्रभिन्न-दिग्वारण-वाहनेन वृष्णा....क्रियते।

श०—प्रभिन्न—मतवाला। वृषा—इन्द्र। वृष—बैल। विनिद्र—विकसित, खिला हुआ। मन्दार—स्वर्ग के पाँच वृक्षों में से एक का नाम।

मल्लि०— यदुक्तं दिगम्बरत्वेन निवेदितं वसु", इत्यत्र तेऽन्या पुरतो विडम्बना" इत्यादि च तत्रोत्तरमाह—असम्पद इति। (प्रभिन्न-दिग्वारण-वाहनः) प्रभिन्नः मदस्रावी दिग्वारणः दिग्गजः वाहनं यस्य सः ऐरावतेन ऊढ इत्यर्थः। वृषा देवेन्द्रः असम्पदः दरिद्रस्य वृषेण गच्छतः वृषभारूढस्य तस्य ईश्वरस्य पादौ मौलिना मुकुटेन उपगम्य प्रणम्य इत्यर्थः। (विनिद्र-मन्दार-रजो-रुणाङ्गुली) विनिद्राणां विकसितानां मन्दाराणां कल्पतरु-कुसुमानां रजोभिः परागैः अरुणा अङ्गुलयः ययोः तौ यथोक्तौ करोति। दिग्गजारोहिणाम् इन्द्रादीनामपि वन्द्यस्य इन्दुमौलेः किं सम्पदा ? वृषारोहणे वा को दोष इत्यर्थः ॥ ८० ॥

टि०—प्रभिन्न-दिग्वारण-वाहनः—प्रभिन्नः दिशः वारणः वाहनं यस्य (बहु०) सः, 'मदबहाता दिग्गज जिसकी सवारी है'। इससे ऐरावत की ओर संकेत है जो इन्द्र की सवारी है। प्रभिन्न—प्र+√भिद्+क्त, यह

मदमत्त हाथी का विशेषण है। (देखो, 'प्रभिन्नो गर्जितो मत्तः' अमर) हाथी को 'प्रभिन्न' इसलिए कहा है क्योंकि वह गाल फट जाने से मद बहाता रहता है। असम्पदः—नास्ति सम्पद् यस्य (बहु०) सः असम्पत् तस्य, धनहीन का। वृषेण गच्छतः—बैल पर चढ़कर जाते हुए (शिव) का। विनिद्र-मन्दार-रजोरुणाङ्गुली—विनिद्राणां मन्दाराणां रजोभिः अरुणा अङ्गुलयो ययोः (बहु०) तौ, 'जिसके (पैरों की) अंगुलियाँ विकसित मन्दार पुष्पों के पराग से लाल रही हैं'। यह समास 'पादौ' का विशेषण है। मन्दार—देवताओं के पाँच वृक्षों में से मन्दार एक वृक्ष है। देखो,

पञ्चैते देवतरवो मन्दारः पारिजातकः।
संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्॥ अमर

इन्द्र अपने मस्तक पर मन्दार पुष्प धारण किये रहता है और जब वह शिव के चरणों में अपना मस्तक झुकाता है तब उसके मन्दार पुष्पों के पराग से शिव के चरण लाल हो जाते हैं। देखो,

"जम्भारिमौलिमन्दारमालिकामधुचुम्बिनः।" कुन्द० १. १.

ब्रह्मचारी के कथन का 'शिव निर्धन है' यह पद्य उत्तर है। पार्वती कहती है कि चाहे शिव निर्धन है तब भी वह देवताओं द्वारा सत्कृत होता है।

हिन्दी—मद-स्रावी (पूर्व-) दिशा का हस्ती-रूप वाहनवाला इन्द्र पास आकर प्रणाम करके बैल पर जानेवाले उस निर्धन (शिव) के पैरों को विकसित मन्दार पुष्पों के पराग से लाल अँगुलियों वाला करता है। [८०]

विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम्।
यमामनन्त्यात्म-भुवोऽपि कारणं
कथं स लक्ष्य-प्रभवो भविष्यति॥ ८१॥

